कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

१।वि॥

हरिः ॐ गंगणपतये श्रीनृसिंहाय नमः॥ ।पालने विमलसत्त्वचेष्टितो येन जन्मकर्मणि रजोऽप्युपेत्य ये। तामसाय जगतः पराकृतद्वैतजालवपुषे नमः सते॥
यस्याः प्रसादमवलंब्य जगद्गुरूणामप्यस्खलत्कृतगताः प्रसरंति वाचः। स्यावेदराश्यपरिनिश्चितवर्णदेहा भूयात्समस्तवरदैव सरस्वती नः॥२॥ विश्वाभिता
पमपहृत्य महीयकस्य बीजं प्ररूढमहनुग्रहवर्षपातैः। संस्थापितः स्थिततरो विगलन्नमेघः सिंचन्नमोघफलमंकुरयत्तमोघं॥३॥ यदमोविशुद्धिकमलावबोध
रागः शांतः सन्नयति तमो विनाशमंतः। ज्ञानीरूपं प्रथयति यो दिशां सहस्रे तं व्यासं नमत जगत्यपूर्वभानुं॥४॥ उद्धृत्य वेदपयसः कमला
मिवाब्धेरालिंगिताखिलजगत्प्रभवैकमूर्त्तिं॥ विद्यामनोपजगतो सुरवनामनाद्यस्तं शंकरं विमलभाष्यकृतं नमामि॥५॥ वंदे तमोऽस संभुदु स्फुरद्बुला
वुद्धोधतः। अर्थतोपि न नाम्नैव यो नन्यानुभवो गुरुः।६। प्रकाशात्मायतिः सम्यक्तत्प्रसादविधा प्रदुप्रसेया॥ यथाप्रकृतं यथाशक्ति मारब्धास्ये पंचपादिकां।
विहितसकलवेद्यैर्न प्रशंसंति लोके सहितमपि महद्भिः किंपुनर्मादृशेन॥ इति विफलसमेस्मिन्नाग्रहेयेत् प्रवृत्तः करकृतमपराधं क्षंतुमर्हंति
संतः।८। ॐ प्रारिप्सितग्रंथस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चाभिमतामितदेवतापूजानमस्कारः कर्तव्यः
तास्त्रार्थश्च तत्त्वंपदार्थौ। विवेकोपायत्वभ्यः प्रसक्तं ब्रह्मणोरैकत्वं लक्षणः संक्षेपतो दर्शनीयः। कृत्स्नस्य भाष्यस्य तत्र तात्पर्यं कथं नायेति
त्कृत्स्नं कृत्स्नसूत्रार्थभूतां संक्षेपतो दर्शयति। अनाद्यानंदकूटस्थज्ञानानंतसदात्मने। अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नम इति। कृत्स्नस्य च भा
ष्यस्य ब्रह्मात्मैकत्वे तात्पर्यमत्र दर्शितं। उत्तरत्राविभज्य तात्पर्यदर्शनात्। अत्र देवतागुरुविषयापूजानमस्कारात्प्रयुक्तं। हिताभाकीर्त्ते कृत्स्न
प्रयोजनसंपत्तिरपि श्रोतृणामपि विषयांगभावं प्रतिपद्यत इति वाङ्मनःकायप्रणिधानैर्गुरूनभिपूजयति। नमः श्रुतिशिरःपद्मषंडमार्तंडमूर्त्तये
इत्यादिभिस्त्रिभिः श्लोकैः। यत्कार्यमुद्दिश्य प्रसंगताच रत्नसंपादितं तं। निर्दिश्यातिप्रसादिष्टं तभारेतोति। नन्वनेकभाष्यं व्याख्यानपदवीमुपारोढु
मर्हति भाष्यलक्षणाभावात्। सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः। स्वपदानि च वर्ण्यंते भाष्यं भाष्यविदो विदुरिति हि नाव्यलक्षणं
भरतं वदंति॥ नन्वथातो ब्रह्मजिज्ञासेति सूत्रेणानुवादत्वपरिहाराय शास्त्रे कृतकृप्रवृत्तिसिद्धये च कर्त्तव्यपदमध्याहर्त्तव्यं॥ तत्र
जिज्ञासापदेनावर्तितं विचारमुपलक्ष्यानुष्ठानयोग्यं साधनचतुष्टयसंपन्नस्य ब्रह्मज्ञानाय विचारः कर्त्तव्य इति सूत्रवाक्यस्यार्थो
तोर्थः संपद्यते। अर्थाद्धिकारी विशेषण मोक्षसाधनं ब्रह्मज्ञानमिति सिध्यति। सन्निधानाच्चवेदांतवाक्यविचार इति कृत्स्नसूत्रार्थभ्यासाध

१

KKSU LIBRARY
RAMTEK
441 106
M1419
Dist. Nagpur

१।वि॥

हरिः ॐ गंगणपतये श्रीनृसिंहाय नमः॥ ।पालने विमलसत्त्वचेष्टितो येन जन्मकर्मणि रजोऽप्युपेत्य ये। तामसाय जगतः पराकृतद्वैतजालवपुषे नमः सते॥
यस्याः प्रसादमवलंब्य जगद्गुरूणामप्यस्खलत्कृतगताः प्रसरंति वाचः। स्यावेदराश्यपरिनिश्चितवर्णदेहा भूयात्समस्तवरदैव सरस्वती नः॥२॥ विश्वाभिता
पमपहृत्य महीयकस्य बीजं प्ररूढमहनुग्रहवर्षपातैः। संस्थापितः स्थिततरो विगलन्नमेघः सिंचन्नमोघफलमंकुरयत्तमोघं॥३॥ यदमोविशुद्धिकमलावबोध
रागः शांतः सन्नयति तमो विनाशमंतः। ज्ञानीरूपं प्रथयति यो दिशां सहस्रे तं व्यासं नमत जगत्यपूर्वभानुं॥४॥ उद्धृत्य वेदपयसः कमला
मिवाब्धेरालिंगिताखिलजगत्प्रभवैकमूर्त्तिं॥ विद्यामनोपजगतो सुरवनामनाद्यस्तं शंकरं विमलभाष्यकृतं नमामि॥५॥ वंदे तमोऽस संभुदु स्फुरद्बुला
वुद्धोधतः। अर्थतोपि न नाम्नैव यो नन्यानुभवो गुरुः।६। प्रकाशात्मायतिः सम्यक्तत्प्रसादविधा प्रदुप्रसेया॥ यथाप्रकृतं यथाशक्ति मारब्धास्ये पंचपादिकां।
विहितसकलवेद्यैर्न प्रशंसंति लोके सहितमपि महद्भिः किंपुनर्मादृशेन॥ इति विफलसमेस्मिन्नाग्रहेयेत् प्रवृत्तः करकृतमपराधं क्षंतुमर्हंति
संतः।८। ॐ प्रारिप्सितग्रंथस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चाभिमतामितदेवतापूजानमस्कारः कर्तव्यः
तास्त्रार्थश्च तत्त्वंपदार्थौ। विवेकोपायत्वभ्यः प्रसक्तं ब्रह्मणोरैकत्वं लक्षणः संक्षेपतो दर्शनीयः। कृत्स्नस्य भाष्यस्य तत्र तात्पर्यं कथं नायेति
त्कृत्स्नं कृत्स्नसूत्रार्थभूतां संक्षेपतो दर्शयति। अनाद्यानंदकूटस्थज्ञानानंतसदात्मने। अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नम इति। कृत्स्नस्य च भा
ष्यस्य ब्रह्मात्मैकत्वे तात्पर्यमत्र दर्शितं। उत्तरत्राविभज्य तात्पर्यदर्शनात्। अत्र देवतागुरुविषयापूजानमस्कारात्प्रयुक्तं। हिताभाकीर्त्ते कृत्स्न
प्रयोजनसंपत्तिरपि श्रोतृणामपि विषयांगभावं प्रतिपद्यत इति वाङ्मनःकायप्रणिधानैर्गुरूनभिपूजयति। नमः श्रुतिशिरःपद्मषंडमार्तंडमूर्त्तये
इत्यादिभिस्त्रिभिः श्लोकैः। यत्कार्यमुद्दिश्य प्रसंगताच रत्नसंपादितं तं। निर्दिश्यातिप्रसादिष्टं तभारेतोति। नन्वनेकभाष्यं व्याख्यानपदवीमुपारोढु
मर्हति भाष्यलक्षणाभावात्। सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः। स्वपदानि च वर्ण्यंते भाष्यं भाष्यविदो विदुरिति हि नाव्यलक्षणं
भरतं वदंति॥ नन्वथातो ब्रह्मजिज्ञासेति सूत्रेणानुवादत्वपरिहाराय शास्त्रे कृतकृप्रवृत्तिसिद्धये च कर्त्तव्यपदमध्याहर्त्तव्यं॥ तत्र
जिज्ञासापदेनावर्तितं विचारमुपलक्ष्यानुष्ठानयोग्यं साधनचतुष्टयसंपन्नस्य ब्रह्मज्ञानाय विचारः कर्त्तव्य इति सूत्रवाक्यस्यार्थो
तोर्थः संपद्यते। अर्थाद्धिकारी विशेषण मोक्षसाधनं ब्रह्मज्ञानमिति सिध्यति। सन्निधानाच्चवेदांतवाक्यविचार इति कृत्स्नसूत्रार्थभ्यासाध

१

Acc. No. ~~1142~~ M1419
Title - पञ्चपादिकाटीका (अपूर्ण)
Author - प्रकाशात्म मुनी.

Date - ?
Subject - वेदान्त
folio - 22
Xerox - 22

Checked 2012

नचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदांतवाक्यविचारः कर्तव्य इति सूत्रवाक्यस्य तात्पर्येण प्रतिपाद्यो भेविगतः॥ तत्रेदं भाष्यं नसूत्रार्थक
त्वामपि प्रतिपादयत्यतो न व्याख्यानार्हमिती मन्वा। केतं द्रोवं परिहरन् भाष्यखंडस्य सूत्रेणार्थादुपात्त। विषयप्रयोजनप्रतिपादने तात्पर्यं दर्शयति
युष्मदस्मत्प्रत्ययगोचरयोरित्याद्यहमिदं ममेदमिति नैसर्गिकोयं लोकव्यवहार इत्येतं भाष्यमस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रति
पत्तये सर्वे वेदांता आरभ्यंत इत्यनेन भाष्येण यथा चास्य शास्त्रस्य विषयः प्रयोजनं चार्थात्प्रथमसूत्रेण सूत्रिते इति प्रतिपादयतीति।
तत्र नैसर्गिकोयं लोकव्यवहार इत्येतं भाष्यं। इति ग्रंथः। शास्त्रस्य विषयः प्रयोजनं च प्रतिपादयतीत्युत्तरेणासंबध्यते॥ ननु कथं भाष्यद्वयमेवविष
यप्रयोजने प्रतिपादयति। शास्त्रारंभनिमित्तविषयप्रयोजनसिद्धिहेतोरध्यासस्योपस्थापकत्वा(दिति ब्रूमः) तल्लेवचनं हि प्रतिज्ञातार्थमेव साधय
ति॥ तथाहि। वेदांतशास्त्रमारंभणीयं। संभावितविषयप्रयोजनत्वात् कृष्याद्यारंभवत्॥ शास्त्रे च संभावितविषयप्रयोजनं आविद्यात्मकबंधप्र
त्यनीकत्वात् ज्ञानप्रदीपवत्॥ इतीत इदं शास्त्रस्यारंभनिमित्तविषयप्रयोजनवत्त्वं प्रत्यनीकस्याविद्यात्मकत्वं निर्दिष्टाभ्यां भाष्यद्वयं विषयप्रयोजने
प्रतिपादयतीति। ननु बंधस्याविद्यात्मकत्वलक्षणो हेतुरसिद्धः कथमसिद्धमसिद्धेन साध्यत इति अत आह सर्वे वेदांता आरभ्यंत इत्यनेन भा
ष्येणापर्यवस्य हेति। विषयादिसिद्धिप्रयादिसिद्धिहेतोरध्यासस्य सिद्धिहेतुभूतानि लक्षणसंभावनासद्भावप्रमाणानि प्रतिपादयता भाष्यता सह
लक्षणादिभिः स्वार्थमध्यासं साधयित्वा विषयप्रयोजने साधयतीत्यर्थः॥ अत एव व्यवधानाव्यवधानाभ्यां विषयादेः साधकत्वादेतदंतमने
नपर्यवसानादिति भाष्यस्याविभागेनोपादानं कृतं। ननु तर्हि सर्वलोकप्रत्यक्ष इत्यनेनपर्यवसानादिति वक्तव्यं। सत्यं॥ अस्यानर्थहेतोरिति भाष्यस्य
विषयप्रयोजनयोर्वेदांतवाक्यसंबंधकथनद्वारेण विचारशास्त्रसंबंधकथनप्रतिपादनपरत्वाद्विचारशास्त्रीयविषयप्रयोजनसाधने सव्यवधानत्वे
साम्येन पूर्वभाष्येणासहोपादानं कृतं। नन्वेवमप्यसूत्रसंबंधिनी विषयप्रयोजने किमिति प्रतिपाद्येते इत्यत आह विषयः प्रयोजनं चार्थात्प्रथमसूत्रेणसू
चिते इतीति॥ इति शब्दो हेतौ॥ यस्मात्प्रथमसूत्रेणार्थात्सूचिते तस्मात्प्रतिपादयतीति॥ कः पुनरस्य सूत्रस्य प्रसंग इति कथ्यते॥ नित्येनैवाध्ययनेनाविधि
नाधीतस्वाध्यायो वेदांतवाक्येष्वापाततदर्शनेन इदमवगच्छति॥ आत्मनस्तु कामाय सर्वं प्रियं भवतीत्युपक्रमात्सर्वतो विरक्तस्यात्मप्रेप्सोरात्मनि विज्ञाते सर्वमिदं विज्ञा
तमेतावदरे खल्वमृतत्वमित्युपसंहाराभ्याममृतत्वसाधनमात्मदर्शनं द्रष्टव्य इत्यनूद्य तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यांगाभ्यां सह श्रव
णं नामांगी विधीयत इति। सत्य च तत्र किं श्रुतिशेषणावयवं तोधिकारी। किं प्रमाणकश्च कोवासौ वेदांतवाक्यविचारः॥ अन्यतः प्राप्तेर्वाप्राप्तेर्वा कथं वा सज्ज्ञानं मो
क्षसाधनं किं प्रमाणकं चेति किंचन तत्त्वं किं प्रमाणकं चेति जिज्ञासते॥ तं च जिज्ञासुं पुरुषार्थकाममनुपलभमानो भगवान्बादरायणः साधनचतु
ष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदांतवाक्यविचारं विदधत्तद्विधेरपेक्षिताधिकारिविषयफलानुबंधत्रयमार्थिकमपि न्यायेनानिर्णे
तुं सूत्रयामास अथातो ब्रह्मजिज्ञासेति। श्रुतिसूत्रयोरैकरूप्यावगमात्॥ मनननिदिध्यासनयोः श्रवणांगत्वमुत्तरत्र वक्ष्यामः॥ ननु श्रोत

वि०२

च्छतीति विधिर्मोक्षसाधनब्रह्मज्ञानाय वेदांतवाक्यविचारं साधनचतुष्टयसंपन्नस्य विधातुं न शक्नोति॥ श्रवणादीनां विषयावगमं प्रत्यन्वयव्यतिरेकसि
द्धसाधनत्वात्॥ न च वचनादेव तदुभयार्थता संभवति। दृष्टादृष्टप्रकारद्वयसाध्यापूर्ववदिहादृष्टसाध्यस्याभावात्। आत्मावगमस्य दृष्टोपायमात्र
साध्यत्वादिति॥ नैतत्सारं॥ आत्मन एव तत्त्वस्यास्य सर्वोपनिषत्प्रतिपाद्यत्वस्य वक्ष्यमाणत्वादिह चाधानादिवदुभयार्थतया विधानोपपत्तेः। ननु विधिपरत्वे
वेदांतानां तन्निष्ठत्वमापाततः स्वरूपस्याविद्यादिदोषप्रसंगान्नास्ति श्रवणादिविधानं भाष्यकारैरेव दूषितं। सत्यं। दीनां विधिस्तत्र निराकृतो
न श्रवणादिविधेः। तत्रोक्तदोषप्रसंगाभावात्। कथं॥ दर्शनविधाने हि ब्रह्म कर्मतया गुणीभूतं प्रसज्यते॥ ब्रह्मदर्शनमुद्दिश्य विचारविधा
नेतु स्वप्रधानफलभूतदर्शनविशेषणतया ब्रह्मापि स्वप्रधानं भवति। न गुणीभूतमिति वेदांतैर्ब्रह्मणि स्वप्रधाने प्रतिपाद्यमाने तदुद्देशेनाय
श्रवणादिविधानं न विरुध्यते॥ नन्वेवमप्युपक्रमोपसंहाराभ्यामेकस्मिन्नात्मप्रतिपादनपरे वाक्ये कथमवांतरवाक्यैः श्रवणादिविधा
नं कल्प्यत इति॥ अवांतरवाक्यभेदेन विविदिषंतीति यज्ञादीनां ज्ञानसंयोगविधानवदुपपत्तिर्देवेभ्य इत्युपरिधारणविधानवच्च मल
वद्वाससो व्रतकलापविधानवच्चेति ब्रूमः। अथवा तस्माद्ब्राह्मणः पांडित्यं निर्विद्येत्यादिवाक्यं श्रवणादिविधायकमस्तु तस्य तत्परत्वात्।
सूत्रकारेणाच वक्ष्यमाणत्वात्। सर्वथापि तावन्मनननिदिध्यासनाभ्यामंगभूताभ्यां सह श्रवणविधानमस्त्विति तस्य वेदोनानुवर्ते येत्र
निर्णीयमानन्यायसूत्रमारब्धं॥ कर्तव्ये चाधिकारिता मोक्षसाधनब्रह्मज्ञानाय वेदांतवाक्यविचारे प्रथमसूत्रेण प्रतिपादिते सच्चक
र्तव्यो विचारो जन्मादिसूत्रमारभ्य प्रवर्त्यत इति॥ तत्र विषयेत्याधिकारिविषयफलानुबंधेषु विषयफलयोरुपादानाय बंधस्य मिथ्यात्वम
नवर्ण्यत इति सूत्रसंगतमेवेदं भाष्यं व्याख्येयमिति। ननु यद्यर्थाद्विषयप्रयोजने सूत्रिते तर्हि भाष्यकारेणात्र सूत्रस्य व्यापारं दर्शयित्वाध्यासस्य समाधानपूर्वकं
साक्षादेव प्रतिपादनीये विषयप्रयोजने। अन्यथा सूत्रकारभाष्यकारयोस्तत्र तात्पर्याभावप्रसंगादिति॥ तत्राहैतच्चेति॥ एतत्तु तस्माद्ब्रह्मजिज्ञासितव्यमित्या
दिभाष्ये स्पष्टतरं। भाष्यकारेणाक्रममिति प्रतिपादयिष्याम इत्यध्याहारः॥ प्रथमग्रंथोक्तमेवार्थमाशंक्य समाधानपूर्वकमतितरां स्पष्टीकर्तुं चोद
यति॥ अत्राहुर्यद्यप्येवमिति॥ नन्वस्यानर्थहेतोरिति भाष्यवत्पूर्वभाष्यमपि विषयादिक्रममेव प्रतिपादयेति। कुतस्तत्प्रायेणानुयोग इति। नेत्याहाहं मनुष्य
इति देहेंद्रियादिष्वादिना। अत्र विचारकर्तव्यताविषयप्रयोजनाध्यासानामुत्तरोत्तरेण पूर्वपूर्वसाध्यत्वे स्पष्टत्वेन सूत्रितत्वादध्यासस्य साध
नद्वारेण विषयप्रयोजने साधयित्वा विचारकर्तव्यता साधनीयेति क्रमं मनसि धृत्वेमं विवक्षन्नाह उच्यत इत्यारभ्य वक्ष्यति चैतद्धि सतः प्राक्तनेन
त्वेन॥ ननु फलतानुप्रयोजनानां विचारकर्तव्यतां सूचयता सूत्रेण कथं बंधनिवृत्तिर्विचारज्ञानयोः प्रयोजनत्वेन सूत्रितेति। तत्राह प्र २
फलज्ञानं हि सूत्रितमनर्थहेतुनिबर्हणमिति॥ विचारसाध्यज्ञानस्य प्रयोजनमाकांक्षन्नु विचारविधेरधिकारिविशेषणं मोक्षं प्रयोजनत्वेन प्र

मित्यतेदूस्यर्थः ।। नन्वनर्था नरकपातादिरप्यपव । शारीरादिप्रतिभासस्य च मिथ्यात्वं साध्यते । इति किं केन संगतमिति नेत्याह नर्थस्य प्रमातृ[illegible]कर्तृत्व
भोक्तृत्वमिति ।। निवर्त्यतां तर्हि ज्ञानेन वस्तुभूतमपि वं प्रमातृत्वप्रमुखं कर्तृत्वभोक्तृत्वमिति ।। नेत्याह तद्यादि न स्तु कृतमिति ।। तथाहि चिधावयविनि नील
नीलं विशिष्टद्रव्यज्ञानं स्वविषयं वा स्वविषयसमवेतं वा रसादि किं विरोधिनं वा पा[illegible]तिमादिरूपाणि निवर्तयति । स्वविषयानवबोधरूपकेवलं सं
निवर्त्यते । स्वाश्रयगतं वस्तुज्ञानेन निवर्त्यत इति चेत् न । घटादिज्ञानेनात्मगतधर्माधर्मादिरूपाणि वृत्तेः । न चाप्रयाविषयोभयसंबंधे वस्तु
ज्ञानेनानिवर्त्यते ।। आत्मनः शरीरावयवज्ञानेन देहात्मसंबंधाद्यनिवृत्तेरिति ।। ननु न दृष्टसामग्री ज्ञानाद्बंधनिवृत्तिर्येनाविद्यात्मकत्वं व
र्ण्येत ।। किं त्वागमप्रवृत्तज्ञानाद्बंधनिवृत्तिं भावयति ।। ननु कृतोपपत्त्यर्थमेव बंधस्याविद्यात्मकत्वं वर्तनीयमेवान्यथाग्नेयादीनां प्रधानया
गानां मध्ये कोऽपूर्वविषयतया अपूर्वकरणभावे कृतेपि कालांतरभावि प्रधानापूर्वसाधनत्वोपपत्त्यर्थं क्रमभावियागक्रमजन्यानि मध्यवर्तीन्यवां
आदि तरापूर्वमिति कल्प्यंते ।। यथा वा कृतस्यैव स्वर्गसाधनत्वस्योपपत्तयेऽपूर्वं कल्प्यते न दृष्टं ।। ननु देशांतिकालांकर्मतां कालांतरवर्त्तिफलसाध
नत्वाभावे नियमाल्लोके वेदे च स्वर्गापूर्वसिद्धौ मध्ये पूर्वमिति कल्प्यंते कृतोपपत्तय इति । तद्धीत्यापि व्याप्तिनियतिरस्त्यादृयतो ज्ञा
नमेव ज्ञानस्यैव निवर्त्तकमिति ।। अतः सूत्रे स्यैनत्वं बंधस्याविद्यात्मकत्वे व्यापारात् सूत्रार्थविचारकर्त्तव्यतोपपत्त्यर्थः प्रयोजनसाधना
सावर्ध्यतर्त्तनीयदस्यात्तद्यथा स्यादिना । सूत्रार्थोपपत्त्युपयोगितयेयं तेन ग्रंथेन ।। ननु सूत्रेणा प्रथमप्रतिपन्नं प्रतिपाद्यमु
किमिति चरमप्रतिपन्नमार्थिकार्थमेव भाष्यकारः प्रथमं वर्णयतीति तत्राह सकलतंत्रोपोद्घातसूत्रमिति । प्रतिपाद्यमर्थं बुद्धौ संगृह्य प्रा
गेव तदर्थमर्थांतरवर्णनमुपोद्घातः ।। प्रतिपाद्यं चादिरेव प्रतिज्ञाय पश्चात्तत्सिद्धये हेतूपवर्णनं प्रतिपादनमिति विभागः । तत्र मिति तंत्रा
र्थो ब्रह्मात्मैकत्वमुच्यते ।। ननु भवतु प्रयोजनसिद्धिहेतुरध्यासः । कथं तंत्रार्थसिद्धिहेतुरित्याशंक्य तत्कथनाय तंत्रार्थं प्रथमं कथ
यति ।। तथा चास्य शास्त्रस्येति । ऐदंपर्यं प्रतिपादितमित्युत्तरेणान्वयः । तदैदंपर्यं कथयामि प्रतिपादयति सुखैकतानेत्यादिना । उप
मर्थः । ब्रह्मात्मैकत्वे वेदांताः पर्यवस्यंतीति यदिदं वेदांतशास्त्रस्यैदंपर्यं तत्सूत्रभाष्याभ्यां प्रतिपादितमिति । तंत्रार्थं प्रदर्श्य तस्याध्या
ससिध्यधीनतयाध्यासस्य प्रथमवर्णनीयतां दर्शयति । तच्चोक्तं कर्त्तासि सुखी दुःखीति ।। ननु शास्त्रमेव प्रसक्तमभिमतमुपि[illegible]
सात्तस्य ब्रह्मात्मैकत्वं प्रतिपादयिष्यति ।। किं पृथगध्यासवर्णनेनेति । तत्राह [illegible]वादिकाकावादिति । ननु शास्त्रार्थसिद्धिरध्यास

वि० २

पराधीना चेत् ।। स एव तर्ह्यध्यासः सूत्रकारेणामुखतो वर्णनीयः ।। तस्य प्राधान्यात् ।। अन्यथा तत्रातात्पर्यप्रसंगादिति । तत्राह वक्ष्यति चैतादिति । तर्हि
पोद्घातत्वात् प्रथममेवाध्यासविषयं सूत्रं प्रणेतव्यमिति चोदयति यद्येवमिति । अर्थनिर्णयप्रधानस्य हि कथालक्षणाया प्रतिपादनप्रक्रियायाः प्रवृत्ते
सूत्रकारेणोपोद्घातप्रक्रियायामिति परिहरति नैवमर्थविशेषोपपत्तेरिति । तर्हि भाष्यकारेणापि यथासूत्रक्रममेव प्रवर्त्तितव्यं ननु सूत्रमुपो
द्घातीति तत्राह भाष्यकारस्त्विति । स्वप्रतिपत्त्यर्थं प्रवर्त्यं ग्रंथभावायेत्यर्थः । एवमपि न व्याख्येयमिदं भाष्यं मंगलाचरणाभावात् । विघ्नोपसंसृष्टत्वा
च्छास्त्रार्थेऽप्रतिपत्त्यन्यथाप्रतिपत्तिसंभवात् ।। शिष्टाचारपरिपालनहीनतया चानाप्तप्रणीतत्वप्रसंगादिति चोदयति ननु ग्रंथकरणादि
कार्यारंभ इति ।। ननु शिष्टानां निष्ठीवनादिप्रवृत्तिः किमन्येनानुस्मरणीयेति ।। नेत्याह । शिष्टाचारकरणं प्रमाणमिति । आचारो धर्मवदेवानुष्ठी
यमानं कर्म प्रमाणं कर्त्तव्यमित्यर्थः ।। ननु प्रयोजनाभावात्किं मंगलाचरणेनेति । नेत्याह प्रारिप्सितं च मंगलाचरणस्येति ।। नन्वत्र विघ्नध्वस्तनादि
अत्यारंभत्वादिति । नेत्याह समाप्तिचेति ।। ननु संभावनामात्राम्नप्रवृत्तिर्विघ्नोपशांतये । किं तु निश्चयादित्यत्राह प्रसिद्धं चेति ।। ननु लो
कप्रसिद्धिर्निर्मूला न विघ्ननिश्चयहेतुरित्यत आह विगीयंते चेति । उपसंहरति तत्कथमिति ।। सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं । येषां हृ
दिस्थो भगवान्मंगलायतनं हरिरिति स्मृतेः । शिष्टाचारपरिपालनाय विघ्नोपशांतये च विशिष्टदेवतानुस्मरणलक्षणं मंगला
चरणं कृतमित्याहात्रोच्यत इति । किं तत्र प्रमाणमित्यत आह युष्मदस्मदित्यादीति । इदं तमेव भाष्यं प्रमाणमित्यर्थः । मंगलाच
रणमिति वा । कथमिदं विशिष्टदेवतास्मरणं गमयतीति तत्राहात्मस्वरूपायमर्थ इति । ननु नेह विशुद्धात्मतत्त्वदेवतानुस्मर्यते किं त्वध्यासः
स्वभावो वर्ण्यत इति । सत्यं । तादर्थ्येन तत्त्वमप्यनुस्मर्यत इत्याह तत्कथं चेति ।। नन्वन्यपरत्वाद्देवतानुस्मृतिरविवक्षिता न तत्कार्यकरी
ति नेत्याह तदन्यपरादेवेति । अन्यार्थमपि देवतानुस्मरणं स्वभावाद्देवविघ्नोपप्लवं धक्ष्यति । धूमार्थ इव वह्निः प्रपणादिकं समिध्या
पः । व्याख्येयत्वं प्रतिपादितमुपसंहरति तस्मादिति । अन्यार्थपरत्वेन युष्मदस्मदित्यादिपदद्वयमर्थाध्याहृतमुत्तरपदं व्याख्या
तुं भाष्यमाद्धाति । विषयविषयिणोरित्यादिना । तत्राद्विविधो विरोधो द्विधा चेतरेतरभावानुपपत्तिः । कथं । द्वयोः पदार्थयोरेक
देशकालानवस्थानसामर्थ्याभावः पदार्थधर्मो विरोधः । तन्निमित्तावस्थानलक्षणाकार्याभावः इतरेतरभावानुपपत्तिरित्येकः
स्कंधः । अपरस्तु पदार्थयोरितरेतरात्मतासामर्थ्याभावः पदार्थधर्मो विरोधः । तन्निमित्तेतरेतरतालक्षणकार्याभावोऽनुपपत्तिरि
+ इतरेतरभावा +

3

सतो द्वैविध्यात्प्रच्छति कोयं विरोध इत्यादिना। तत्र प्रथमं पक्षं दूषयति यदि तावदित्यादिना सहानवस्थानमुक्तं वेदितव्यमित्यंतेन ग्रंथे-
न। तत्र तमःप्रकाशशब्दाभ्यां ल्योयोतप्रदर्शितोऽसग्रहणमंशोक्तेस्तत्राचित्सत्तावस्थ्यो नमुक्तमिति द्रष्टव्यं॥ इदानीं द्वितीयं पक्षमवलंब्य
ते उच्यते परस्परशानात्मता लक्षणा इत्यादिना॥ ननु तमो नाम आलोकाभावमात्रमिति केचित्। रूपदर्शनाभावमात्रमित्यन्ये। तत्कथं दृग्द-
श्ययोरिदं दृष्टांतत्वेनोपादीयत इति॥ उच्यते। उपलब्धप्राप्त्यवस्थाभेदाद्विशेषविशिष्टं रूपवत्तया चोपलभ्यमानं तमः कथं द्रव्यमा-
+ भावि रूपयो + भावविध्यामासी द्वेतु॥ बहुलालोकवृत्ततेपि द्वेशेनिमीलितनयनस्य गोलकांतर्वर्ति तमोदर्शनमंधकारोपलब्धिः। पि-
हितकर्णपुटस्यांतरशब्दोपलब्धिवन्नाविरुध्यते॥ आलोकं विना। शीतस्पर्शवत्तमसः पुनर्मूलकारणाद्रव्यप्रादिति महता। विद्युत्प्रादेव। ज-
न्मासिध्यति। ननु रूपवतो द्रव्यस्य स्पर्शवत्त्वनियमात्तद्रहितं तमः कथं रूपवद्द्रव्यमवगम्येत॥ नैष दोषः। वायोरन्यत्र स्पर्शवद्द्रव्यस्य
रूपवत्त्वनियमेपि रूपरहितस्य स्पर्शवतो वायोरभ्युपगमात्॥ तद्दर्शनान्नियमाद्वेवस्पर्शहीनस्य रूपवत्तमसः सिद्धेः। धूमस्य वह्नि-
प्रवर्तकत्वः प्रदेशादन्यत्र स्पर्शानुपलब्धेः। तद्वत्सर्वत्र स्पर्शहीनं तमः किं न स्यात्। सवितृकिरणासंतते च देशे दीपालोक-
जन्मविनाशयोः प्रागभावप्रध्वंसाभावेतरेतराभावे पुत्तमोप्युच्यद्दर्शनान्नालोकाभावमात्रं तमः। सर्वालोकाभावश्चेत्सर्वालोका-
संनिधाने तर्हि निवर्तेत। बहुलांधकारस्य रेतापवरकांतरवस्थितस्यापि जहीरूपदर्शनेन सप्ताप्वरकांतस्त्तमोदर्शनान्न
रूपदर्शनाभावमात्रं तमः अस्त्ंतमतिप्रसंगेन॥ ननु दृग्दृश्ययोरितरेतरभावानुपपत्तिस्तयोर्विभ्रमनिमित्तं तादात्म्या-
निरूपाधिः॥ शुक्तिरजतयोरपि हि तादात्म्यहीनयोरेव विभ्रमनिमित्तमेकाधिकरणमवभासते। तद्वदिहापि स्यादिति चेदाह
यत्ति। कथमिति॥ सत्यमिदं शमात्रस्याधिष्ठानस्य रजतस्य चाध्यस्यमानस्य केचित्तादात्म्यमस्त्येव। तत्राधिष्ठानसामान्यां-
शस्याध्यस्यमानविशेषांशस्य च केचित्सामान्यविशेषभावेनवा गुणगुणिभावेनवा समानाधिकरणतस्यान्यत्रान्यतरांशावतः प्रद-
र्शसमदर्शनादन्यतरांशाध्यासो विभ्रमो दृष्टः। तद्वदिहाप्यधिष्ठानस्य चितेरध्यस्यमानस्य वानात्मनो नास्तीत्याह स्वतस्तावदि-
प्रयितामुप्त्रिटेकरसस्यनयुष्मदर्थासंभव इत्यादिना। अयमाशयः। द्रष्टुराचिद्रूपः स्वाविकोवास्याद्रागंतुकोवेति। न स्वा-
भाविक इत्याह स्वतस्तावदिति। चेर्स हिजडचैतन्यस्य कर्मकारकतयावभासते। तत्कथमेकस्याः क्रियायाः कर्तृविपरीतस्यानगतं

४ब्र॰

कर्मकारकमात्मा स्यादित्यभिप्रायः। आगंतुकश्चेत्सहेतुर्निर्हेतुर्वा निर्हेतुश्चेत्तत्राह अपरिणामित्वादिति॥ नहि निरवयवं वस्तु स्वतः साव-
द्याकारेण परिणममानं दृष्टमित्यभिप्रायः। न सहेतुरित्याह निरंजनत्वादिति। नहि निरवयवमाकाशं हेतूपरागात्परिणममानं दृष्टं। मि-
स्यर्थः। तल्लक्षणमेवाधिष्ठानमात्मानात्मकं कंचिद्दृष्टमिति नेत्याह विषयस्यापीति। समत्वादिति। अयमर्थः। यथा द्रष्टुर्दृश्यांतरं न प्र-
त्यक्षगोचरोऽहमेवमेव तत्॥ एवं विषयोपि स्यादिति॥ परतोपि नानोसनेनं छिद्राकारपरिणामो जडोपादानस्यापि कार्यस्य जडत्वात्।
तर्ह्यस्मच्चैतन्यमेवानात्मा स्वांशत्वेन स्वीकरोतीति चेन्न तत्राह चितेरप्रतिसंक्रमत्वादिति॥ तस्मात्क्वचिदपि तादात्म्यादर्शनादन्यत्रान्त-
तरांशदर्शनेनान्यतरांशाध्यासो नोपपद्यत इति। तद्धर्माणामपि सुतरामितरेतराभाव एवाध्यासस्य पृष्ठ इत्यतः प्रत्युक्तोऽन्यथः
स्यप्यार्थः। नन्वहंकारादिषु शरीरांतेषु अहमित्येव प्रत्ययो न त्विदमिति। तत्कथमेषां युष्मत्प्रत्ययगोचरत्वमिति। तत्राह तद्वत्तनिर्मा-
सितत्वेति। तस्यास्मत्प्रत्ययगोचरस्य चैतन्यस्यत्वलेन निर्भासस्यत्वादहंकारादेः प्रतिभासतो युष्मदर्थत्वाभावेऽपि अपरोक्षत-
यावभासत्वेन लक्षतो न युष्मदर्थभावोऽपज्यत इत्यर्थः। चैतन्यात्पृथक्त्वेनावभासंत इति। अंतःकरणरूपाधीनानेव
वभासंत इत्यर्थः। भूयोवयवसामान्यसादृश्याभावाद्यसन्निकर्तृत्वादहंकाराद्युपाधिनिमित्तभ्रमत्वेऽपि शरीराद्यध्यास-
सस्यस्योपाधिकभ्रमत्वाभावादृष्टं यदहंकारादिशरीरांतप्रत्यध्यासासंभवं प्राप्तिमंगीकरोति यद्येवमिति। निरुपाधिकेऽत्र
मकार्यदर्शनमेव कल्पावयवसामान्याभावेपि केतकीगंधस्य दृष्टाः सर्पगंध इति वत्सादृश्यं वा शंखपीतिमादिवत्कारणांत-
रं वा कल्पयतीत्याह तथापीत्यादिना। एवमध्यासस्यापीत्यभिप्रायइत्यंतेन ग्रंथेन। नैसर्गिकशब्दार्थमाह। प्रत्यक्चैतन्यस-
तामाज्ञानुबंधीति॥ कथं। आत्मनि कर्तृत्वभोक्तृत्वदोषसंयोगरूपाध्यासः। तत्र भोक्तृत्वाध्यासः कर्तृत्वाध्यासमपेक्षते अके-
र्भोगाभावात्॥ कर्तृत्वं च रागद्वेषसंयोगाध्यासमपेक्षते। तद्रहितस्य कर्तृत्वाभावात्॥ दोषसंयोगश्च भोक्तृत्वमपेक्षते अनुप-
कर्तृके अतज्जातीयेच्छारागाद्यनुपपत्तेरेवं बीजांकुरवद्धेतुपरंपरयानादित्वादध्यासस्य नैसर्गिकत्वमिति। लोकव्यव-
हारशब्दोध्यासाभिधायीति दर्शयति लोक इति मनुष्योहमित्यादिना। व्यवहारोभिलाभिवदनमुपादानमर्थक्रियेति चक्षुर्वि-
१ तोयोहं मनुष्य इति लोकाभिधाने व्यवहारशब्दमहत इत्यर्थः इति भावः। अन्यस्यान्यात्मतावभासाविद्येत्युक्ते शुक्लो घट इत्या-

प्रसंगो॰

दि प्रत्ययानामध्यासत्वेमाभूदिति सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभासो विवेति स्वसिद्धांतमंगीकृत्य सत्यानृते मिथुनीकृत्ये
त्युक्तं। तेद्धा चेष्ठ सत्यमानिदं चैतन्यमित्यादिना। ननु त्वक्तौ प्रत्ययोपादानादर्थतः क्रियाभेदः पूर्वापरीभावश्चांगीकर्त्तव्यस्तत्कथमे
ध्यासमिथुनीकरणलोकव्यवहाराणामेकार्थत्वमिति नेत्याह। अध्यस्य मिथुनीकृत्येत्यादिना। ननु केयमिति स्वरूपमात्रपर्यवसानं॥ क्रि
याभेदस्त्वेकप्रत्ययसामर्थ्यादुपादीयतामिति नेत्याह उपसंहारे चेति॥ नहि पदमात्रवैयर्थ्यभयाद्वाक्यार्थो नैसर्गिकत्वादिविरोधो
विरोध्यपहार्योध्यासस्य उपक्रमोपसंहारयोर्भेदं युक्तं स्वाभिप्रायः॥ किं तर्हि त्वक्तौ प्रत्ययार्थं बनाभ्रेति। प्रतिपादितनः क्रियाभेदपूर्वापरीभा
वाविसाहत्यात्तन्नैतन्नयं पुरुषस्वरूपमिति बहुपदेशमात्रं उपचारमात्रमित्यर्थः॥ कथं केऽप्यध्यासोन्योन्यात्मकता सत्यानृ
ते अहमिदं ममेदमिति च विशेषणाभेदाद्विशिष्टोध्यासः परोपाधौ भिद्यते॥ विशेषाभप्रत्ययाश्च वक्तुः क्रमेणाभवंतीति प्रति
पत्तितः पूर्वापरीभावं विशेषणभेदाच्चाविशिष्टाकैयाभेदं चांगीकृत्य त्वक्तौ प्रत्ययइति। तत्राज्ञानमित्युक्ते ज्ञानाभावमात्रमुक्तं स्या
न्मिथ्येत्युक्ते भ्रांतिज्ञानमितिस्यात्तदुभयव्यावृत्त्यर्थं निरुच्यपदार्थौ दर्शयति मिथ्या च तदज्ञानं चेत्यादिना। ननु कथं मि
थ्याज्ञानमध्यासस्योपादानं तस्मिन्सत्यध्यासोदयादसति चानुदयादिति ब्रूमः। नन्वध्यासस्य प्रतिबंधकं तत्वज्ञानं तदभावश्चाज्ञान
मिति प्रतिबंधकाभावविषयतया अज्ञानस्याध्यासेनान्वयव्यतिरेकावन्यथासिद्धौ। नैतत्सारं। पुष्कलकारणे हि सति कार्योत्पादवि
रोधि प्रतिबंधकं। न चाध्यासपुष्कलकारणे सति तत्त्वज्ञानं कार्यप्रतिबंधकतया जायते। किं त्वसत्येवाध्यासकारणे तत्त्वज्ञानोदयः।
तस्मान्नाज्ञानान्वयव्यतिरेकौ प्रतिबंधकाभावविषयौ। तथापि विरोधिसंसर्गाभावइति चेन्न कार्यस्य कारणापेक्षाद्धि प्रथममु
पद्यते। न विरोधिसंसर्गाभावापेक्षा। तस्मात्प्रथमापेक्षितकारणकॢप्तिमेवान्वयव्यतिरेकौ न्यायसाद्धितौ कुर्वीतौ। ननु कृ
तविषयेंद्रियादिदोषः कारणमिति। सत्यं। निमित्तं तु तत्। उपादानापेक्षायामज्ञानमनुप्रविशति। सर्वं च कार्यं सोपादानं घटा
वो दिवदित्यनुमानात्। क्रियागुणादेरपि साश्रयस्यैव त्यक्तेः। उक्तं च यत्ना आश्रयस्यैवोपादानत्वात्॥ नन्वात्मांतःकरणं वा भ्रांतिज्ञा
नोपादानं भविष्यति। न। आत्मनोपरिणामित्वादंतःकरणस्येंद्रियसंयोगादिसापेक्षत्वात्। मिथ्यार्थे च प्रत्ययमात्राविपरिव
र्ता नित्यद्योगात्॥ अविद्यानमानेन्यथासिद्धत्वादन्वयव्यतिरेकयोरंतःकरणस्यापि जडत्वादज्ञानत्वादात्मनो भ्रांत

वि॰ ५ त्वप्रसंगाच्च॥ तस्मान्मिथ्यार्थतज्ज्ञानात्मकं मिथ्याभूतमध्यासस्योपादानकारणं सापेक्षं प्रत्ययनाश्रयस्वानतया काचादिनिमित्तकारणो
पुमिद्यमानेषु मिथ्याभूतस्यैव सर्वकार्यस्वभावात्तु फूलस्य सर्वत्रानुगमादज्ञानस्य। साश्रयतमाभ्रांतिज्ञानाश्रयकोटिनिवि
ष्टत्वाच्च। मिथ्याज्ञानमेवाध्यासोपादानं नात्मांतःकरणकाचादिदोषाः इति सूक्तं। आत्माश्रयाध्यासस्य प्रकृतिकासंसर्गो विभ्रम
इतिवक्ष्यते॥ एकस्यैवाध्यासस्य नैसर्गिकत्वं नैमित्तिकत्वं च विरुद्धमिति चोदयति कथं पुनरिति। तत्र प्रथमं तावदध्यासप्र
वाहजन्मनोपादानकारणरूपेणानैसर्गिकत्वं। कार्यव्यक्तिरूपेतानैमित्तिकत्वमित्यविरोधं दर्शयितुमात्मन्यभावरूपम
ज्ञानं साधयति अवस्थमेणाविद्यात्मकेरिति। अथवस्थमेवेति प्रमाणद्वयवत्त्वात्। प्रत्यक्षं तावदहमज्ञो मामन्यं च न जानामीति
अपरोक्षावभासदर्शनात्। ननु ज्ञानाभावविषयोयमवभासः। न। अपरोक्षावभासत्वादहं सुखीतिवत्। अभावस्य षष्ठ
प्रमाणगम्यत्वात् प्रत्यक्षाभाववादिनोपि नात्मनि ज्ञानाभावावगमः संभवति। मयि ज्ञानं नास्तीति प्रतिपत्तावात्मनि धर्मिणि प्र
तियोगिनि चावगते तत्र ज्ञानसद्भावात् ज्ञानाभावप्रतिपत्त्ययोगात्। अनवगतेपि धर्म्यादौ सुतरामभावानवगमात्॥
षष्ठप्रमाणगोचरेफलर्लिंगाभावानुमेयेपि ज्ञानाभावे आत्माद्यवगतेनवगतेप्यात्मनि ज्ञानाभावप्रतिपत्त्ययोगाद्वि
हत्वदुक्तमर्थं संरक्ष्यावाशास्त्रार्थं वा न जानामीति विषयव्यावृत्तमज्ञानमनुभूयत इत्युक्तवणादैः प्रवर्त्तते॥ भावरूपाज्ञानस्य प्रत्यक्षत्वा
देतु सत्यपि आश्रयप्रतियोगिज्ञाने ज्ञानाभावस्येव भावांतरस्यापि नानुपपत्तिर्निर्वक्तुं शक्यते॥ न च आश्रयप्रतियोगिज्ञानभूतमपि साक्षिचैतन्यं भा
वांतरस्याज्ञानस्य निवर्तकं। तस्याज्ञानविषयप्रतिभासत्वात्। न हि स्वज्ञानेनैव स्वयं निवर्त्तते॥ ननु ज्ञानस्य व्यावर्त्तको विषयः कथं साक्षि
चैतन्येनावभास्यते प्रमाणायत्तत्वाद्विषयसिद्धेरिति। उच्यते। सर्वं वस्तु ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य विषय एव। तत्र ज्ञाततयावि
षयः प्रमाणव्यवधानमपेक्षते। अन्यस्तु सामान्याकारेणाविशेषाकारेण वाज्ञानव्यावर्त्तकतया सदावभास्यते॥ इत्युपपत्तिसहितमज्ञानं
प्रत्यक्षं भावरूपमेवासन्यज्ञानं गमयतीति सिद्धं॥ अनुमानमपि॥ विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरण
स्वनिवर्त्यस्वदेशगतवस्त्वंतरपूर्वकं भवितुमर्हति। अप्रकाशितार्थप्रकाशत्वात्। अंधकारे प्रथमोत्पन्नप्रभावदिति॥ ततश्च समानाश्रय

विषयंभावरूपमज्ञानं सिद्धं॥ शक्तिरित्यात्मपरतंत्रतयात्मनः स्वकार्योपादानस्य निर्वोढृत्वमात्र। तत्स्वरूपमात्मतत्त्वं तत्सत्तामात्रानुबंधिनीत्य
र्थः॥ किं चार्थापत्तिरपि भावरूपाज्ञानसद्भावे प्रमाणमित्याह। अन्यथा मिथ्यार्थावभासानुपपत्तेरिति॥ विशुद्धप्रत्यगात्मनि शुक्तिकायां वाहंका
ररजताध्यासस्यार्थज्ञानात्मकस्य मिथ्याभूतस्य मिथ्याभूतमेव किंचिदुपादानमन्वेषणीयं। सत्योपादानत्वे कार्यस्य कारणस्वभावतयाध्यास
स्यापि सत्यत्वप्रसंगात्। न स्यापि मिथ्योपादानस्य सादित्वे तथाविधोपादानांतरकल्पनाप्रसंगादनाद्येव तदुपादानं। मिथ्योपादानमिति कल्प
नीयं। यच्चानादि स्वयं मिथ्याभूतं मिथ्योपादानमात्मसंबंधि च तदज्ञानमिति मिथ्यार्थाध्यासस्यैव तथाविधाज्ञानोपादानकारणमंतरेणानु
पपद्यमानस्तत्कल्पयतीत्युक्तं॥ ननु येन यस्यातिशय उत्पद्यते स तस्य विषयः। न चाज्ञानेनानात्मन्यावरणातिशयजन्म। प्रमाणाभावा
त्। अर्थानुपपत्तेश्च॥ न तावदवगते नीलादौ तत्रावरणकृत्यमवगतत्वेऽस्याक्षयते। अनवगते तु नतरां। नन्ववगते सति पूर्वमावृतमित्यवग
म्यतां। न। धारावाहिकविज्ञानगम्येऽर्थे पूर्वमवगतस्यापि पश्चादवगमदर्शनात्। न। न्विदानीमेवावगतत्वं पूर्वमनवगतिं साधयति॥
ना॥ पूर्वमनवगतिमविज्ञायेदानीमेवावगतमित्यवधारणायोगात्॥ ननु पूर्वापरप्रत्यभिज्ञानमध्येऽनवगतिरवगम्यत इति चेत्। न प्रत्य
भिज्ञानुपपत्तिर्मध्येऽनवगतिं साधयति॥ धारावाहिकेऽप्यात्मनि सदावगतेन तद्दर्शनान्मध्येऽज्ञानस्यैवाभावादनवगतिरवगम्यत इ
ति चेन्नावगतेऽपि स्मृतिनियमाभावात्॥ तथापि विषयानवगतिः प्रतीयत इति। सत्यं। विषयैः सहाज्ञानस्य साक्षिचैतन्येऽध्यासात्प्रति
भासः। न चाध्यस्तस्यावरणमस्ति हि चेदज्ञानादध्यस्तस्य प्रमाणगम्यत्वाभावात्। तस्मान्नास्त्यनात्मन्यावरणे प्रमाणं। न च स्वय
मेव प्रकाशहीनस्यावरणार्थोऽपि संभवति॥ तस्मादतिशयाभावान्नाज्ञानविषयोऽनात्मेति। तत्राह सा च न जडेषु वस्तुषु तत्स्वरूपाव
भासं प्रतिबध्नातीति॥ किं त्वन्यदेवानात्मन्यतिशयकार्यं कुर्वदात्मविषयमज्ञानमिति वक्ष्यत इत्यभिप्रायः। तत्र हेतुः प्रमाणवैकल्याद्वेति।
अथवा चैतन्यप्रकाशो न जडानां निःस्वरूपत्वाद्वया निःस्वतत्प्रकाशोऽप्राप्ते संभवसेवानात्मन्यावरणकृत्सा [illegible] प्रमाणवैकल्याद्वेति॥
ना अनात्मनि प्रमाणस्य चैतन्यस्य वैकल्याद्वावरणादेव विषयानवभासिद्धेर्न विषये पृथगावरणं कल्पनीयमित्यर्थः॥ इतश्चानात्मन्याव
रणमित्याह। रजतप्रतिभासादिति। यद्यप्याश्रयमज्ञानमात्मावरणं स्यात्तदावरणाविनाशमंतरेण विषयावभासायोगात्। तद्विषयज्ञानेना
त्मन्यज्ञानं निवर्तेत। ततः समस्ते वात्मनि अविद्यायां त्रिष्वपि कालेषु विषयस्वरूपप्रतिभासदर्शनान्नानात्मावरणमज्ञानमिति भावः। ननु
शुक्तिकाविषयमज्ञानमन्यदेवात्तज्ज्ञानान्निवर्तते। अन्यच्चात्मविषयमज्ञानं मा स्म निवर्तमानमिति। तन्न। आत्माप्रथमात्मा। विषयं चा

वि॰६ ज्ञानमंतरेणानात्मस्फुरति विषयं भावरूपाज्ञानसद्भावे प्रमाणाभावात्॥ विषयाग्रहणस्य प्रमाणवैकल्यादप्युपपत्तेः॥ किं च तर्ह्यतिशयमज्ञानं जे ता
न्यमाश्रित्य सत्यत्वाध्यासिकेषु वस्तुष्वित्यनात्मविषयमज्ञानं दर्शितमिति। तदाह तत्र रूपांतरावभासहेतुरेव केवलमिति। नन्वत्राप्यनुपपत्तिः
समाना। कथं॥ शुक्तिज्ञानं हि रूपांतरावभासं निवर्तयत्तदुपादानमज्ञानमपि निवर्तयतीति ते मतं। तत्र कथं शुक्तिकाज्ञानात्सहाध्यासेनाज्ञाने निवर्त्य
माने पुनरात्मन्यज्ञानं दृश्येत। ततः प्रतिविषयमज्ञानभेदोऽध्यासस्याज्ञानानुपादानत्वं वाज्ञानोपादाननिवृत्तिमंतरेणाध्यासनिवृत्तिर्वा प्रसज्येतेति॥
उच्यते॥ अस्मिन्पक्षे शुक्तिकादिज्ञाने रजताद्यध्यासानां स्वकारणे प्रविलयमात्रं क्रियते मुद्गरप्रहारेणेव घटस्य। अथवा। मूलाज्ञान
स्यैवावस्थाभेदा रजताद्युपादानानि शुक्तिकादिज्ञानैः सहाध्यासेन निवर्त्यंत इति कल्प्यतां। कथं पुनर्लौकिके सहाज्ञानेनाध्यासस्य तत्त्व
ज्ञानान्निवृत्तेरप्रतिपत्तौ अत्रात्मज्ञानात्सहाज्ञानेनाध्यासस्य। निवृत्तिर्दृष्टद्वारेण कल्प्यत इति। नैव दोषः। तत्त्वावभासविरोधिनोऽग्रहणमि
थ्याज्ञानादेस्तत्त्वज्ञानेन निवर्त्यत्वदर्शनादिहापि तत्त्वावभासविरोधितयैव भावरूपाज्ञानादेः कल्प्यमानत्वात्तस्य तत्त्वज्ञानान्निवृत्तेरुपपत्तेः॥
न चावरणपक्षोक्तदोषप्रसंगः॥ विषयव्यावर्तकरूपांतरस्य भ्रांतिज्ञानेनावगमात्॥ नन्वेवमात्मन्यप्यज्ञाननिमित्तमावरणकृत्यं नास्ति। कथं। न
तावदावरणं प्रकाशविलोपः। स्वरूपस्यानपायात्॥ नापि सत एव प्रकाशस्य कार्यप्रतिबंधः। ज्ञानस्याविषयावभासात्मनो हि तस्य स्वकार्ये प्रतिबंध
प्रतीत्यभावात्॥ तस्मान्नैवात्मन्यपि भावरूपमज्ञानमनुपयोगादिति। तत्राह प्रत्यगात्मनि तु चितिस्वभावत्वात्स्वयंप्रकाशमान इत्यादिना तस्यानव
भास इत्येतेन ग्रंथेन॥ अयमर्थः। अस्ति प्रकाशत इत्याद्यभिज्ञादिव्यवहारपुष्कलकारणे सति नास्ति न प्रकाशते चेति योऽयमात्मतत्त्वावलं
बनो व्यवहारः स भावरूपेण केनचिदात्मन्यावरणमंतरेण नोपपद्यते॥ सति पुष्कलकारणे असति चावरणे सन्निहिते घटे प्रकाशत इत्यादिव्यवहार
दर्शनादतो नास्ति अलं न प्रकाशते चेति व्यवहारोऽन्यथानुपपत्त्या भावरूपमज्ञानं गमयतीत्यर्थापत्तिरनुमानं वा समुन्नेयार्थः। ला। सिध्यर्थमात्मनि
प्रकाशत इत्यादिव्यवहारं प्रति पुष्कलकारणतां दर्शयतीति॥ चितिस्वभावत्वादिति॥ किं तर्ह्यावरणमिति॥ तत्राह ब्रह्मस्वरूपानवभासस्येति॥ नास्ति
न प्रकाशत इति व्यवहारालंबनयोग्यत्वस्य व्यवहारकार्यदर्शनादेव कल्प्यमानस्येत्यर्थः। न चाधिष्ठानप्रतिबंधमंतरेण तत्र विपर्ययकार्यमुपपद्यते॥
अविद्यासंबंधादेवावरणस्यानिरूपिताकारता च युक्तेति भावः। ननु प्रमाणवैकल्याद्वा तत्राप्यग्रहणमिति। नेत्याह अनन्यनिमित्तत्वादिति॥ अतो नव
भासात्पुष्कलकारणे सति परिशेषादिदमायातमित्याह। तदुक्तं निसर्गसिद्धाविद्याशक्तिप्रतिबंधादेव तस्यानवभास इति। मुक्तेरुपायांतरस्यास ६
भवादिति भावः। अतः कार्यदर्शनोन्नेयमावरणकृत्यं विपर्ययं चात्मनि कुर्वाणमज्ञानं भावरूपमेवोभयकारणत्वान्यथानुपपत्त्या कल्प्य
त इत्याह। अतः साक्षात्कृते चितीति। नन्वग्रहणमिथ्याज्ञाने तत्संस्कारेभ्योऽन्यदज्ञानं नाम न पश्यामः॥ तन्न च जीवस्य स्वयंप्रकाशमपि प्रसिद्ध

स्वरूपावभासं प्रतीत्य भ्रान्तीति नैयायिकस्तु ख्यातौ चेत्। तत्राप्यविद्याशक्तिः संस्कारमात्रं वा स्यादिति चेत्। न संस्कारादध्यासज्ञानमिति सर्वः। कथं॥
नानावस्तुख्यातौ स्वयंप्रकाशे ब्रह्मस्वरूपानवभासः पुरुषान्तरसंवेदनवद्दृष्टं भिन्नत्वादिति शंकावकाशः। एकत्वश्रुतेः। नापि मिथ्याज्ञानप्रति-
बन्धात्तत्र तस्याभावात्॥ नापि तत्संस्कारप्रतिबन्धात्। भ्रान्तिसंस्काराणां तदावभासप्रतिबन्धकत्वाभावात्। सत्स्वपि रजतभ्रमसंस्कारेषु शुक्ति-
कावबोधदर्शनात्॥ नाप्यग्रहणं प्रतिबन्धात्॥ स्वरूपग्रहणस्य नित्यत्वात्॥ स्वयंप्रकाशमाने संवेदने तद्विषयकाग्रहणस्य प्रति-
बन्धकत्वात्॥ नापि कर्मणां स्वरूपावभासनिरोधितो॥ सर्वप्राकृतमात्रस्यापि चैतन्यस्यानवभासप्रसंगात्॥ अज्ञानेपि तुल्यमिति चेन्न। तस्य स्व-
विषयचैतन्यावभासप्रतिबन्धकत्वात्॥ न चाज्ञानस्येव कर्मणां निसर्गतः सा शक्तिः। चैतन्येनावभास्यत्वात्। येन तदवभासकं तद्भासकं चैत-
न्यमप्रतिबध्नं प्रकाशेत॥ न च कर्मणोऽस्यावभासावरोधित्वानि प्रमाणमस्ति॥ संस्कारत्वाच्च कर्मणां भ्रान्तिसंस्कारवत् प्रतिब-
धकता। तस्मात्सुषुप्त्यादौ स्वरूपानवभासव्यवहारोऽयं हेतुर्मिथ्याज्ञानतत्संस्कारकर्मभ्योऽन्यद्वाच्यं। चित्प्रतिबन्धकमज्ञानं कल्प-
यतीत्यर्थः॥ ननु द्वैतान्तरमेव प्रतिबन्धकं कल्प्यतां किमज्ञानकल्पनयेति॥ नैतत्। ब्रह्मज्ञानात्प्रतिबन्धनिवृत्तिमन्तरेण स्वविषयावभासायोगात्
ज्ञानान्नैव तस्य चाज्ञानत्वात्।॥ अत्र काश्चिद्देहाभेदाभ्यां सर्वसंकरवादी देहात्मार्थगहनसंप्रदायहीनो दुर्जनरमणीयां वाचं जल्पति।
नास्त्येतदग्रहणमिथ्याज्ञानतत्संस्कारादिभ्योऽन्यत् सकलसंसारबीजभूतमवस्थात्रयेप्यनपायात् संसारविमोक्षादुद्दायमानमज्ञानं ना-
मास्ति॥ किं तु भ्रान्तिज्ञानमग्रहणं वाज्ञानमिति। अयं प्रष्टव्यः। कथं भ्रान्तिरिति। अहंकारादिशरीरपर्यन्तेनानात्मन्यात्मबुद्धिरिति चेत्। अ-
हो विस्मरणशीलता सर्वत्र संकीर्णचेतसः स्वबुद्धिरेवेयमस्त्यादि भेदाभेदप्रत्ययं प्रमाणमनुपपादयन् नाहं मनुष्य इति प्रत्ययं। भेदाभे-
दविषयं किमित्युपेक्षसे॥ नाहं मनुष्यो ब्रह्मास्मीति प्रत्ययसामर्थ्यादिति चेत्तन्न नायं खण्डो गौः किं तु मुण्डो गौरिति प्रत्ययेपि खण्ड-
मुण्डाभ्यां गोत्वस्याभे~~[illegible]~~वत्शरीरब्रह्मण्यां जीवस्याभेदप्रत्ययस्यापि प्रामाण्योपपत्तेः। इदं रजतं न शुक्तिरिति-
वन्न। खण्डो गौरित्यत्रापि तथा प्रसंगात्। नायं खण्डो गौः किं तु मुण्ड इति व्यक्त्यन्तरे खण्डस्य गोत्वोपाधौ निषेधप्रत्ययसामर्थ्यादिति। तत्रापि
वत्सरानुच्छेदात् प्रामाण्यमिति चेत्। तदहं मनुष्य इत्यत्रापि तुल्यं। मोक्षावस्थायामपि सर्वात्मकत्वात् तेन सर्वशरीरे इन्द्रियाद्यभि-
मानस्य वर्तमानुच्छेदात्॥ जातिव्यक्तिगताकृतौ कार्यकारणत्वाशीम स्वरूपानुशीसंबन्धो यत्रापि घटेतत्र भेदाभेदौ। न शरीरा-
त्मनोः तथात्मभावादिति चेत्। तर्हि शरीरशरीरिसंबन्धोपि गडुतागडुत्वादिवद्देहनिमित्तं किं न स्यात्। अन्यथा सर्वसंकरवादितया

चि॰ ७

क्षपणकशिष्यत्वाच्चिरकालमुपार्जिता व्याख्येत॥ अस्ति च चेतनस्वरूपशरीरयोः कार्यकारणभावश्चेतनस्वरूपांशस्य ब्रह्मत्वादनोनते भ्रान्तिरस्ति॥ किं च॥
भ्रान्तिज्ञानमन्तःकरणपरिणामश्चेत्तदात्मा प्रत्यादिध्यानस्यादन्तःकरणपरिणामएवात्मन्यध्यस्त इति चेत्। तथाप्यन्यथाख्यातिवादिनः संसर्गस्य
शून्यत्वादसौ विद्यासंबन्धो न स्यात्॥ न चात्मपरिणामो भ्रान्तिरपरिणामित्वात्॥ न च ज्ञानगुणस्य द्रव्यस्य पुनर्ज्ञानगुणान्तराकारेण परिणामः संभ-
वस्वान्तरजातीयस्यैकस्मिन्द्रव्ये गुणद्वयस्य युगपत्समवायायोगात्॥ न हि पटे शौक्ल्यद्वयं युगपत्समवैति॥ तस्मादनादिसिद्धमिथ्याज्ञा-
नाभ्युपगमे न काचित्सर्वसंकरवादिनो गतिः। घासंभवस्तनादिमिथ्याज्ञानसंबन्धोप्यात्मनि अज्ञानवदनादिकत्वादाकाशकार्यत्वान्मन-
नः कूटस्थतां न विहन्ति नित्यलभ्यताप्रसंगेन॥ अत्र च प्रत्यक्षानुमानार्थापत्त्यागमादिभावरूपाज्ञाने प्रमाणान्युपन्यस्तानि। तत्रैवं भूतेन का-
रणात्मना कार्यरूपेण च सर्वसर्गकर्तृत्वेन मित्तिकर्तृत्वे नैसर्गिकत्वे न विरुद्धेनरूपसंहरति। अतो नैसर्गिकोयमहंकार इति॥ अन्योन्यधर्मधर्मि-
त्यादिरध्यासस्वरूपं दर्शयति। यतोऽयं ग्रन्थः स्पष्टार्थः॥ निष्कलंकचैतन्यैकतानेनिरंशानन्दैकरसे अज्ञानादिसाक्षिणि अनादिसिद्धे प्रत्य-
नाध्यासे का हानिः केनमध्यासमाक्षिपत्याहमिति तावत्प्रथमोध्यास इति॥ नहि इदं रजतमितिवदध्यासद्वैरूप्यमहमिति आपि वक्तव्यं॥ अहमिति चैकरूपेणा-
वभासते ततो नाध्यास इति चोदयति॥ नन्वहमिति निरंशं चैतन्यमात्रमिति॥ यथा द्वैरूप्येणाध्याससंभवस्तथावक्ष्यत इत्याह यथाध्यस्तांशान्तर्भाव इति। न चैतत्क-
रतोऽद्वयात्मात्मनः पृथक्सत्त्वोपलब्ध्यभावादध्यस्ततयैव सिद्धेरात्मतत्त्वावबोधेन च स्वरूपतो विलयप्रवणतत्स्वरूपेणासंस्पृष्टरूपेण चात्मन्य-
ध्यस्ततया सिद्धिरस्तु। शरीरं पुनरिन्द्रियैरिदं बुद्धिगृहीतत्वाल्लोकवत्त्वसाक्षिवेद्यत्वाभावादुक्तान्तेप्यात्मनि पृथगुपलब्धेर्न तेषु लयप्रवणत्वेनाध्यस्ततया
सिद्धमिति चोदयति नन्विदमित्यहंकर्तुरिति॥ शरीरव्यतिरिक्तं मम बुद्धिगृहीतं सुतरामनध्यस्तमित्याह ममेदमिति चेति॥ शरीरादिपदार्थस्वरूपस्य मिथ्या-
कल्पितकर्तृभोक्तृप्रमातृदोषसंप्रयुक्तात्मार्थतयैव कार्यतया भोग्यतया दृश्यतया च तादर्थ्येनैव स्वरूपलाभात्स्वरूपेणापि मिथ्यात्वं सत्प्रदर्शनं तेनानुमातुं शातदृष्ट्या
हृदुच्यते यद्देवाहंकर्त्रेत्यादिना॥ दार्ष्टान्तिके दर्शयति एवमहंकर्तृत्वप्रमुख इति। दृष्टान्तदर्शयेऽवभासस्याविद्याध्यासत्वेशास्त्रीयविषयप्रयोजन-
सिद्धिः कालित्यतीत्याह तस्मादेवं ब्रह्मलातां सानुभवपर्यन्तादिति॥ तादृग्ब्रह्मात्मानुभवोवधि निवृत्तिश्चोपपद्यत इत्यर्थः। विषयप्रयोजनसिद्धौ कि-
मायातमिति। शास्त्रारंभकर्तव्यतासिद्धेत्याह तदर्थविषयवेदान्तमीमांसारंभ इति॥ तदेवब्रह्मात्मानुभवबंधनिवृत्तिरर्थः प्रयोजनं विषय-
श्च यस्य वेदान्तमीमांसारंभस्येति विग्रहः। सर्वलोकप्रत्यक्ष इत्यस्य तस्योत्तरभाष्यस्य तात्पर्यमाह आहकोयमित्यादीति। इदानीं भेदभावान्तर-
तात्पर्यं कथयति तत्रापीति॥ लक्षणसंभावनापरं भाष्यमाक्षिपति यद्येवमिति॥ किमिति लक्षणासंभावने नापेक्षेते इति। तत्राह न ख्यातिरूपमिति॥ ७

प्रमाणमेवाद्रिप्रमेयमन्यस्यान्यात्मतावभासमध्यासं व्यवस्थापयत्स्वदेशकालोपाध्यौ संभावितरूपं सर्वतो व्यावृत्तासाधारणरूपं च व्यवस्थापयति। किं पृथग्लक्षणेन संभावनोपन्यासेनेत्यर्थः। ननु चानुमानादिप्रमाणैर्निर्णीतेषु वस्तुमात्रेषु विनैव लक्षणासंभावने पृथगपेक्ष्येते अत आह दुःसंपाद्यमिति॥ विशेषत इति असाधारणाकारव्यावृत्ततयेत्यर्थः॥ तत्र दृष्टमन्यस्य तद्रूपेणान्यात्मनावभासो विद्यत इत्येतावति प्रमाणावदयते॥ न तस्याविद्याभ्रांत्यध्यासमिथ्यात्वे। अतस्तल्लक्षणमात्रेण न सिध्यतीति परिहरति उच्यते। न हि दृष्टियादृष्टिरित्यादिना॥ ननु चान्यस्यान्यात्मतावभासप्रमाणेनैव तन्मिथ्यात्वमपि सिध्यति धर्मैक्यादिति चोदयति तत्कस्य हेतोरिति॥ नानुभवाभावादेवेति परिहरति। लोकइति॥ ननु प्रमाणेऽसति किमित्यनुभवाभावः। प्रमाणाभावेऽपि स्यात्॥ बाधे हि सतीति। बाध्यानुपपत्तिर्मिथ्यात्वे प्रमाणं। प्रत्यक्षानुमानव्यवहारार्थापत्त्यागमाश्चासन्यनास्यावभासे प्रमाणमि~~त्यर्थ~~तिभावः॥ नन्विहापि बाधनिमित्तमितरेतरयोर्विवेकमंतरेणान्यस्यान्यात्मतावभासोऽयमित्यवगंतुं न शक्यते॥ अन्यथास्वस्यैवस्वेनात्मनावभासः किं न स्यादिति। नेत्याह नेह सावेद्यत इति॥ यौक्तिकज्ञानादिनापरोक्षविवेकमाश्रित्य परस्परात्मतावभासनिश्चयोऽपरोक्षबाधस्य भ्रांतिप्रतिभासोच्छेदिनोऽभावान्न स्पष्टो मिथ्याबाध्यव्यवसाय इति भावः। अतो मिथ्यात्वस्य स्पष्टीकरणाय लक्षणोपादानम न वक्तव्यमित्याह तस्मादध्यासस्येति॥ तर्हि लक्षणप्रमाणाभ्यामेव वस्तुनिर्णयसिद्धेः प्रमाणतो नैवासंभावनानिराकरणात्संभावना पृथग्वक्तव्येति चोदयति नन्वेवमपीति॥ सत्यपि प्रमाणसामर्थ्ये प्रत्यावभासमप्यसंभाव्यमानतया निराकृतमनुभूयत इत्यनुभवमेवालं व्यपदिशति। सत्यमेवमिति॥ ओस्यातिकइस्य दृष्टव्यतिरिक्तकारणशून्य इत्यर्थः॥ ननु प्रमाणतो नैव च काचिदसंभावना तिरस्क्रियते यथाकाशगमने पक्षिणां। केचित्त्वसंभावनया प्रतिभासोऽपरोक्षोऽपि तिरस्क्रियते यथा सवितृस्पष्टौ। तत्रात्मन्यनात्मावभासः कं पक्षमवलंबतामिति। असंभावनापक्षमेवेति विशेषं दर्शयिष्यन्नविषये संग इति॥ अधिष्ठानस्याध्यस्यमानेन सहैकज्ञान विषयत्वं वक्तव्यं। तदभावान्नाध्याससंभव इत्याहाविषय इति। दृष्टव्यतिरिक्तस्य कस्यचित्कार्यकारणसंघातस्याध्यासात्मकत्वेन दृष्टयैव का चादिवद्दोषानुषंगो वक्तव्यस्तदभावान्नाध्यास इत्याहासंग इति॥ अधिष्ठानस्याध्यस्यमानेन गुणावयवसादृश्यं वक्तव्यं। तदभा वान्नाध्यास इत्याह केनचिदपि गुणादिनेति। अधिष्ठानयाथात्म्यावभासोऽध्यासविरोधी। तद्भावाच्चेनाध्याससंभव इत्याह निष्कलत्वे कचैतन्यतयेति। नन्वात्मन्यविषयादिरूपेणावगतेनासंभावनाबुद्धिः अवगतेऽपि नाध्यासस्तातित्तिकृतोऽसंभावनाबुद्धिरिति॥ नैतत्सारं॥ आत्मन्यविषयादिरूपेपरोक्षावभासोऽसंभावनाबुद्धिहेतुरपरोक्षावभासोऽध्यासस्य निवर्तक इति युक्तत्वात्। उपसंहरति तन्मात्रांकीति॥ तदुच्यते। त्रितयं लक्षणासंभावनाप्रमाणं क्रमेणोच्यत इत्यर्थः। अनंतरभाष्यतात्पर्यमाह एकोयमि

वि॰

मेलीति। तं प्रतीति॥ फलपदार्थद्वयविवक्षयेत्यर्थः। उभयस्य चेह संभवादिति। लक्षणप्रत्युक्तस्यासंभावनाक्षेपस्य च संभवादित्यर्थः। उभयमप्येवाविवादिचेत्संभावनैव प्राथम्यं किं न प्रदर्शितमित्यत आह तत्रापीति॥ स्वरूपमाख्यायेति प्राथम्ये हेतुः। नन्वाहेति परोक्तिकथनं किमर्थमिति। अर्थनिर्णयप्रधानत्वाद्वादकथाशास्त्रे॥ तत्र प्रमाणतर्कसाधनोपालंभः सिद्धांताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद इति वादिप्रतिवादिभ्यां गुरुशिष्याभ्यां वा पक्षप्रतिपक्षपरिग्रहेण क्रियमाणार्थनिर्णयावसाना वादकथा च प्रवृत्तेति दर्शयितुं परोक्तिकथनमित्याह तत्रैवंभूतविषय इत्यादिना॥ तेनाक्षिप्तमाक्षेपरूपमपि अभिप्रायमनेन प्रदर्शयेदेवेति मन्यमानस्योक्तं पुनरस्यावाक्षेपरूपेणावृत्तोतीत्याक्षेपमवतार्य [illegible] व्याचष्टे। ननु शास्त्रेषु जल्पवितंडाभिप्रायेणापि परोक्तिरुक्तेति नेत्याह सर्वत्रैवंविध इति। ननु लक्षणवाक्ये लक्ष्याभिधायिनः पदस्याभावात्साकांक्षं वचनमनर्थकमिति साकांक्षवाक्यं पूरयति। प्रश्नवाक्यस्थेनेति॥ ननु परस्परात्मनावभासोऽध्यास इति वक्ष्यति॥ तत्कथमेकेनैव परशब्देन लक्षणं पूर्यत इत्यत आह परत्रेति॥ किमेराति उत्तरो ग्रंथः स्पष्टार्थः॥ ननु घञादीनां भावे विधानात्कथं कर्मपरतया स्मृतिवाक्ये व्युत्पाद्यत इति तत्राह संज्ञायामपीति। कर्तृव्यतिरिक्तकारके पुंसंज्ञायामिवासंज्ञायामपि प्रयोगो भवति अकर्तरि च कारके संज्ञायामिति सूत्रादित्यर्थः॥ ननु स्मर्यत इत्येव दृष्टपरशब्दः किमर्थ इति। अस्मर्यमाणो वस्तुन्युपमासमासार्थ इत्याह स्मर्यमाणरूपमिवेति॥ ननु किमुपमासमासेन स्मर्यत एवेदं रजतमिति। नेत्याह॥ स पुनः स्मर्यत एवेति। ननु चक्षुरादिप्रमाणाभावात्पारिशेष्यात्स्मृतिरिति नेत्याह स्पष्टं पुरोऽवस्थितत्वावभासनादिति। यथा चेदं रजतमयं घट इत्यादौ इतरेतरसंसृष्टौ सामान्यविशेषाववभासेते तत्र चेत्प्रतिप्रतिभासः। नहि परमार्थेदं रजतसंवेदनाकारावभासन्यूनतामंतरेण संसर्गसंविदोऽभावः शक्यते वक्तुं॥ अर्थाभावे कथमपरोक्षा संविदिति चेत्। न। यथा संविद्वभासाधीनत्वादर्थसत्तानिश्चयस्य॥ नह्यर्थसत्तानिश्चयाधीनः संवित्सत्तानिश्चयः। अर्थसत्तानिश्चयस्यापि निश्चयांतराधीनत्वप्रसंगात्॥ ननु नेदं रजतमित्युत्तरसंवेदनादर्थाभावो निश्चितः। न। तत्रापि पूर्वसंवेदनेन सद्भावनिश्चये तद्विरोधात्॥ इदं रजताभावसंवेदनानामूनि विकल्पनयोत्तरसंवेदनेऽपि संसर्गसंवेदनाभावः। किं न स्यात्॥ व्यवहारसंवादज्ञानादुत्तरज्ञाने संसर्गसंवित्सद्भावच्छिन्नार्थक्रियासंवादज्ञानानार्थसंवित्सद्भावनिश्चय इति वदंतः संविदरप्रत्यक्षवादज्ञानात्। अर्थक्रियासंवादोऽपि संविदंतराधीनसद्भावनिश्चयप्रसंगात्॥ ननु संप्रतिपन्नोऽर्थाभावः॥ न। यथाप्रतिभासमेव मिथ्यारजतस्योत्तरज्ञानेन निरसनयोग्यस्योपगमात्॥ लौकिकपरमार्थदृष्ट्या रजतप्रतियोगिकाभावविषयत्वाद्रजतत्रैकाभावज्ञानस्येति। संविद्द्वयानुरोधेन व्यवस्थासिद्धिरन्यतरस्यानिदृष्टकार्यायोगात्॥ तथा चोभयसंविद्विषयानुभवो भास्त्यत्र रजतं मिथ्यैव रजतमभादिति॥ नन्वपरोक्षशुक्तिज्ञानाविवेकाद्रजतमपरोक्षतयावभासत इति। नेत्याह स्पष्टमिति॥ कथं स्पष्टता नाम॥ विवेकज्ञानसमयेऽप्येतावंतं कालमिदं रजतमभादिति संस्पष्टावभासत्वेन प्रत्यभिज्ञानयोग्यता। अथात इदं रजतमेतावंतं कालमिति

प

विविक्तमिति प्रतीयात्॥ अथवा तद्ज्ञानात्तत्र प्रवृत्तिरिति पक्षार्थे वाज्ञानं तत्स्वरूपयोर्नियमाद्दृष्टापि संसर्गप्रवृत्तिनिमित्तता संसर्गज्ञानस्य स्पष्टा इति॥ पूर्वदृष्टा
वभास इति स्पष्टार्थः। यद्वा ज्ञानविशिष्टोर्थ एवाध्यासस्तत्रास्मर्यमाणसदृशोन्यात्मनावभासमानोन्योर्थोध्यास इत्येवं लक्षणापरतया वाक्यं योजितं।
यद्वा पुनरर्थविशिष्टं ज्ञानमेवाध्यासस्तत्र स्मृतिसमानोन्यस्यान्यात्मतावभास इत्येवं लक्षणापरतया तदेव वाक्यं योजयितुं वाक्यत इत्याह यतोर्था
दिति। अर्थाद्वाक्यसामर्थ्यादित्यर्थः। कथमित्यादिः स्पष्टार्थः॥ ननु नेस्मृतिश्चेद्वाति: प्रत्यक्षज्ञानवदपूर्वानुभवजन्यत्वमिति आशंक्य संप्रयोग
मात्रजन्यज्ञानादन्येषां सर्वेषामविशिष्टं पूर्वप्रमाणजन्यत्वमन्वयव्यतिरेकसामर्थ्यादित्याह न त्वसंप्रयुक्तावभासिन इति॥ ननु संस्कारजन्यत्व
क्षपगतं चेदन्यस्यैव संप्रयुक्ते चक्षुषि यदनंतरं ज्ञानमुत्पद्यते सा स्मृतिरेव॥ तदेवधानेनतुय ज्ञानमुत्पद्यते तदनुमानादिप्रमाणमिति प्रमाणस्मृतिद्वैराश्य
मेव विज्ञानस्य। न तर्हि मिथ्याज्ञानं नाम+ मन्यविषयं + मासत्ख्यातिवादी प्रत्यवतिष्ठते॥ अपर आहेत्यादिना। ननु स्मृतिश्चेद्भवयादिस्मृतिवत्स्वार्थे
ष्टत्वमात्राद्विविच्य स्मरामीति द्रष्टव्ये इत्यत आह प्रमोषात्त्विति। ननु शुक्तिकासंप्रयोगे सादृश्याद्रजतं किमिति स्मर्यते न सादृश्यात् शुक्तिकात
रमेवाक्षि स्मर्यतामिति नेत्याह द्विपाटीनामिति। ननु माभूत्स्मृतेः प्रमोषात्स्वार्थविवेकिता। गृहीतं तु स्वार्थं स्मर्यमाणाद्विवेचयेदिति। तेनाह स्व
प्रयुक्तस्य चेति। ननु स्मृतिग्रहणयोर्योगपद्याभावात् क्रमवर्त्तिपूर्वज्ञानं व्यवधानान्न प्रवृत्तिहेतुः॥ न च सामान्यमात्रज्ञानादिविशेषमा
त्रज्ञानाद्वा प्रवृत्तिरित्यत आह तेनेद्वयोर्निस्मरणयोर्निरंतरोत्पन्नयोरिति॥ निरंतरोत्पत्तिरेव प्रवृत्तिहेतुरित्यर्थः॥ नान्वेदं रजतमित्य
भादिति संसर्गप्रत्ययः प्रत्यभिज्ञायत इति नेत्याह नानुसंधानविवेकज्ञानावभास इति। जन्मांतरानुभूतं च न स्मर्यत इति भाष्यवचनात् स्मर्यमाणत्वाच्च
ज्ञातस्यातिक्तस्मृतिः कथमिति चोदयति नन्वनास्वादितेतिक्तरसस्येति॥ जन्मांतरानुभूततिक्तस्मृतिः कल्प्यत इति प्राप्नोत्यत इति। जन्मांतरानुभ
वस्योपकारितामान्यथानुभूतेति। किमिति तर्हि जन्मांतरानुभूतं किंचिदेव स्मर्यते। न सर्वमिति। शेषबलादित्याह तस्मात्प्रपित्तमेवेति। किमिति
तर्हि शेषवदेव जन्मांतरानुभूतं सर्वं न स्मारयेत्॥ अत आह कार्यगम्यत्वादिति॥ ननु तत्त्वेतत्त्वज्ञानमिति नास्त्येकारेणेव दर्शितः संसर्गविभ्रम इति
नेत्याहैतेनान्यसंप्रयोग इति॥ वक्तव्ये च पूर्ववादिनाप्यविवेके संसर्गज्ञानकल्पनागौरवादख्यातिरेव युक्तेति भावः। उच्यते केयमख्यातिरि
ति॥ न तावत्ख्यात्यभावमात्रमनभ्युपगमात्॥ अतिप्रसंगाच्च॥ अन्यार्थेच्छानोन्यत्र प्रवृत्तिहेतुज्ञानमिति चेत्॥ यत्र तर्हि न प्रवृत्तिरीदृशीति वाध
तत्र कथं भ्रांतिः॥ अथ विविक्तानेकपदार्थज्ञानं। तर्हीदमिति रजतमिति चापुनरुक्तशब्दद्वयस्मृतिहेतुतया विविक्तावभासनान्न सामान्यवि
शेषयोरविवेको भ्रमः संभवति। न च भेदावमर्शेन केचित्तान्नमनभ्युपगच्छतः सामान्यविशेषयोरविवेकः संभवति। विविक्ताकारद्वयावभास
नादितरेतराभावमेदाद्धिस्वादिसंख्याविशिष्टज्ञानं विवेक इति चेत्। गामानय दंडेनेति गोदंडयोस्तत्कारकत्वयोश्चा। विवेको भ्रमः स्यात्तत्रा

वि० ९

गं

प्यानुषंगेकमेदादि ज्ञानमस्तीति चेत्। इदमिति रजतमिति चेत्प्रत्यक्पुनरुक्तशब्दानुषक्ताकारद्वयावभासे द्विचाद्यवभासो निश्चित एव॥ अन्यथासा
मान्याकार। द्विवो आकारस्य विवेकानवभासादिदमित्येवस्याद्रजतमिति वास्यान्नेदं रजतमिति॥ किंच प्रतीयमानाकारयोर्नीविवेकोपुनरुक्त
क्तप्रतिभासादपूर्तीयमानाकाराविवेको नभ्रमोतिप्रसंगात्॥ तस्मान्नो विवेकोभ्रमः॥ किंच खंडो गौरित्यादिप्रत्ययाच्छा। विविक्तानेकपदार्थविष
याविभ्रमाः प्रसज्जेरन्॥ न च ग्रहणस्मरणाविवेकः स्वभ्रमः अहं मनुष्य इति प्रत्यक्षप्रमाणाविवेकस्याभ्रमत्वात्। सामान्यविशेषाद्वैसंसर्गज्ञानमेव
नास्तीति चेत्तथाप्यविविक्तानेकपदार्थज्ञानाद्भ्रमत्वमपि स्यात्॥ न च तत्र संसर्गप्रत्ययोपेक्ष्य तमालत्वं नस्याभावात्॥ गुणगुण्यादिसंबंधस्य
वालंबनमिति चेत्। न। प्रत्यभिज्ञायाव्यक्तत्वं बनस्थादिमापिसादृश्यसंबंधस्य वेदं रजतमिति संसर्गप्रत्ययालंबनं स्यात्॥ अपि तु च सामा
न्यविशेषादीनामिदं रजतयोरिवाविवेकप्रसंगो घटस्य चौकुमिति विवेकाभ्युपगमात्॥ किंचाग्रहणमेवस्मर्यमाणस्वार्थं किं नाविवि
च्यात्॥ विशेषदर्शनाभावादिति चेत्। यदि गृहीतमात्रस्य रजतादेरस्ति तत्राभेदापेक्षितो विशेषो धर्म्याकारः प्रतियोग्याकारो वा नान्य
इति गृहीतस्य चभेदाकारो विविक्तः प्रतीयेत॥ अथ धर्मि प्रति योग्याकारे गृहीतिपीतरेतरापेक्षत्वात्तत्रमेव ज्ञानं भेदग्राहकमेतीति तर्हि स
र्वपदार्थज्ञानानां भेदग्रहणात् प्रागविविक्तत्वाद्भ्रमत्वप्रसंगः॥ अथ न गृहीतमात्रस्य रजतादेः स्वस्थैकमेवेति संसर्गज्ञानस्य सालंबन
ता सिद्धिः॥ किंचास्मृतिर्वा गवयादिस्मृतेर्वा क्षमाणात्स्वार्थं किमिति न विविच्यात्॥ स्मरणाभिमानप्रमोषादिति चेत्तत्राह कोयं स्मरणाभिमान इ
ति॥ न तावत्स्मृतिरेव॥ तस्याः प्रमोषज्ञानस्यैवाभावप्रसंगात्॥ स्मृतेरन्यश्चेत् कथमन्यस्य प्रमोषे परिपूर्णमुत्पन्नं ज्ञानं स्वकार्यमर्थविवेकं न
कुर्यात्॥ न चान्यः स्मरणाभिमानो दृश्यत इति भावः॥ ननु पूर्वानुभवतद्देशकालानामन्यतमेन सह इत्याकारेणावास्मर्यमाणस्य संभेदः स्मरणा
भिमान इति नेत्याह॥ न तावद्ज्ञानान्तर्वेदितया ग्रहणमिति॥ सोयमिति प्रत्यभिज्ञाभ्रमे हि सर्वेषामेवैषां सोहमित्याकारस्य पूर्वानुभवदेशकालानां
च स्मरामीति पर्येतानां संभेदावगमेपि ग्रहणस्मरणाविवेकदर्शनादिति भावः॥ न च पूर्वानुभवसंभेदः स्मर्यमाणोसंभवतीत्याह न चेति वक्तस्येति॥
अर्थस्मृतिसंस्कारस्य जनकं यत्पूर्वविज्ञानं तत्स्वयं ग्राह्यविशेषणतया स्वैनैव विषयी क्रियते॥ अर्थमात्रविषयत्वात्पूर्वज्ञानस्य॥ नहि पूर्वज्ञा
नेनाविषयीकृते विषये तत्संस्कारजन्या स्मृतिः समुत्पद्यते॥ तस्मादर्थमात्रविषयज्ञानजन्यास्मृतिरर्थमात्रमेव विषयीकरोति॥ न पूर्वज्ञानेनाविषयीकृतं
ज्ञानमपि॥ अन्यथा नीलज्ञानात्पीतेपि स्मृतिः स्यात्॥ ननु स्मर्यमाणे पूर्वानुभवसंभेदः स्वानुभवसिद्धः सत्यं॥ पूर्वानुभवसमयेर्थावभासमर्थलिंग
जन्यमर्थज्ञानसद्भावविषयमर्थज्ञानमुत्पन्नं। तदनुमानज्ञानसंस्कारजनितास्मृतिरनुभवसंभिन्नमर्थं गमयति॥ मूलज्ञानेनाप्यर्थज्ञानविषयेण विशि ९

नुमान

र्थविषयाकरणात्॥ यस्मादर्थस्मृतिसमनंतरमनुभवविशिष्टार्थस्मृत्यंतरजननादर्थस्मृतिरेवानुभवसंभिन्नेति भावः। तस्मात्तदुद्धमेवार्थमित्युपसं

हरति शुद्धमिति॥ पूर्वज्ञानेन यावन्मात्रं वस्तुमात्रं वा ज्ञानसंभिन्नं वा वस्तु विषयीकृतं। तावन्मात्रमेवावभासयति। न स्वच्छमूलज्ञानसंभिन्नमित्यर्थः॥ नन्वर्थस्मृति
र्विज्ञानसंभिन्नविषया स्मर्यंतरं वेत्यत्र को विवेक इति। तत्रोदाहरणमाह तथा च पदात्पदार्थस्मृताविति॥ वाक्यार्थप्रत्ययविवक्षायां यावदंत्यपदज्ञा
नापरिसमाप्ति तावत्क्रमेण ज्ञायमानेषु पदेषु एकैकस्मात्पदादेकैकार्थविषयाणि ज्ञानान्युत्पद्यंते॥ तान्यसंबंधिनो दर्शनात्संबंध्यंतरार्थवि
षयाः स्मृतय इत्यभिहितान्वयवादिनामन्विताभिधानवादिनां च संमतं॥ ननु कोसौ शब्दस्यार्थेन संबंधः। यतः शब्दस्य दर्शनादर्थे स्मृतिरुत्पद्यते॥ अर्थबुद्धि
जननसामर्थ्यलक्षण इति चेत्॥ किं स्मृतिजननसामर्थ्यलक्षणोन्यो वा। न चान्यः। पदानां पदार्थेषु स्मृतिव्यतिरिक्तकार्यांतराभावात्। न च स्मृति
जननसामर्थ्यसंबंधादेव स्मृतिजन्म। अन्यत्र सादृश्यादिसंबंधांतरे सत्यन्यतरदर्शनेन्यतरस्मृतेर्दर्शनात्॥ तस्मान्न शब्दादर्थे स्मृतिरिति। उच्यते॥ सं
बंधज्ञानसंस्कारः शब्ददर्शनं चात्र स्मृतिहेतुः। नार्थेन संबंधविशिष्टशब्दज्ञानं। येन विशिष्टे स्मृतिसामर्थ्यव्यवस्थापनाद्धि शेषलीभूतसंबंधांतर
मिष्येत॥ संबंधविशिष्टान्यतरदर्शनाज्ञान्यतरस्मृतौ संबंधविशेषणत्वेनान्यतरस्यापि स्मृतिविषयस्य प्रागेव बुद्धत्वात्स्यात्सादृश्यादिम
त्संबंधानां बुद्धिसामर्थ्यलक्षणत्वाभावात्सामर्थ्यसंबंधादर्थांतरत्वं न विरुध्यते॥ बुद्धिसामर्थ्यसंबंधाद्बुद्धिर्नोत्पद्यत इति चेत्स्ववचने
विरोधः। तस्मात्पदेभ्यः पदार्थमात्रेषु बुद्धिसामर्थ्यसंबंधात्स्मृतय इति सिद्धं॥ कुतः पुनस्तत्र ज्ञानसंभेदावभासः इति तत्राह ज्ञानस्यापीति। शब्दे
सामर्थ्यविषयतया संबंधित्वेन स्मृतिविषयत्वे ज्ञानस्यापि शब्दार्थत्वप्रसंगादिति। तथेह भूयमभागविषये स्यादिः स्पष्टार्थः॥ ननु स्मृतिज्ञानस्य
त्रिकोणत्वादिवत्स्वगतः कश्चिद्विशेषो दृश्यते॥ स स्मरणाभिमान इति नेत्याह नापि स्वतो ज्ञानस्येति॥ ननु नित्यानुमेयेपि लिंगविशेषाद्भेदविशेषानु
मानं युक्तमिति॥ कोसौ लिंगविशेषः। न तावदज्ञात्यविशेषस्याहृतं नापि ज्ञात्यविशेष इति। अस्तु तर्हि फलविशेषो लिंगविशेष इति। नेत्याह नापि फल
पिफलविशेष इति॥ ननु स्मरामीत्यनुभवः स्मरणाभिमानः। अत आह यः पुनः। निमित्त। स्मृ॥ क्वचित्कदाचिदिति॥ यदि स्मृते स्मार्यस्मरणं दे
विषयशब्दत्रयानुषक्तोयमनुभवविशेषस्तत्स्मरामीति। यद्वा ज्ञातविषयमनुमानज्ञानांतरमेतत् उभयथापि ग्रहणादित्रितयात्स्मरणादित्रित
यस्य प्रागेव भेदावगममंतरेणाग्रहणात्। त्रितयशब्द [illegible] व्यतिरिक्तस्मरणादित्रितयशब्दानुस्मरणं ग्रहणानुमानव्यतिरेकेण स्मरणानुमाने त्र
नसंभवति। विशिष्टाभिधेयावगमनिमित्तत्वाद्विशेषशब्दानुस्मरणस्य। विशेषार्थानुमानस्य चेति। प्रागेव स्मरामीत्यनुभवाद्ग्रहणस्मरणयोर्भे
दोव्यक्तव्यक्तिभावः। ननु स्मृत्यनुभवयोरर्थमात्रविषयत्वे को भेद इत्यत आह तस्मादिति॥ कारणविशेषादेव भेद इत्यर्थः। केयं वा तेन स्मृतेर्ज्ञा
नानुमानस्य चार्थविशिष्टज्ञानविषयत्वे समाने विभागावगमः। कारणभेदादिति चेत्। इतरापि तत्समानं। सदृशाकारेण स्मृतिर्ज्ञानानुमानाद्भिद्य
त इति चेत्। कोयं सदृशाकारः। परोक्षदेशकालविशिष्टतेति चेत्। अनुमानादिष्वपि प्रसंगः। पूर्वानुभवसंभिन्नतेति चेत्। ज्ञानानुमानेपि

वि०१०

श्रीं।

पौरुषेयवाक्यजन्यज्ञाने च प्रसंगः॥ तस्मात्संस्कारजन्यत्वं सदृशाकारतेति। अस्तु तर्हि तापि तथाविधैव स्मृतिरिति नेत्याह न चेति॥ न च स्वच्छेदं नील
मिति ग्रहणस्मरणाविवेकः स्मर्यमाणानामन्योन्याविवेके परोक्षमेव सर्वमवभासेत। ततो न प्रमाणास्मृतिर्द्वैराश्यमेव विज्ञानस्य। किं तृतीयं भ्रांतिज्ञानमप
स्मृपसंरति अतो नान्यसंप्रयोग इति। न चेत्स्मृतिः किं तर्हीदं रजतमिति॥ ननु अन्यथाख्यातिरेषा। तथाहि। शुक्तिकासंप्रयोगे दोषोपहतमिंद्रियं दे
शांतरादिगतमपि रजतं गृह्णाति। न चैतच्च देशाद्यवस्थितं दोषोपहतेंद्रियेण गृह्यमाणं शुक्तिकात्मना गृह्यते। नन्वननुभूतमपि यत्किंचिद
पि दोषोपहतमिंद्रियं किमिति न गृह्णाति। सादृश्यादिदोषसामर्थ्यादिति वदामः। तस्मादुक्तेन सकलमन्यथाज्ञानमन्यथाख्यातिरिति॥ उच्यते। केयमन्य
थाख्यातिरिति॥ अन्याकारं ज्ञानमन्यालंबनं वा। वस्तुनो वस्त्वंतरात्मनावभासो वा। अन्यथापरिणते वस्तुनि ज्ञानं वा। न तावत्प्रथमः कल्प इत्याह
नन्वेवं सति वैपरीत्यमिति। कुतो वैपरीत्यमित्यत आह येतत्संविदनुसारित्वामिति। सर्वत्र यदाकारं संवेदनं तदेवालंबनमिति नियमे रजताकार
संवेदने निरुद्धं शुक्तिकालंबनमित्यर्थः। ननु नैवं संविदाकारतालंबनता सर्वत्र॥ किंतु संवित्प्रयुक्तव्यवहारविषयतेति चोदयति। ननु शुक्तेः
स्वरूपेणापीति॥ इदं तावद्यु ॥चे॥ तं॥ न हि व्याघ्रसर्पादिज्ञानानां दंडादिष्वादीयमानेषु व्याघ्रादिज्ञानस्य दंडाद्यालंबनं। न हि ते व्याघ्रतादिज्ञानस्य
कुतश्चोदव्यवहारादिष्वादीयमानेषु व्याघ्रादीनामन्योन्यज्ञानालंबनत्वप्रसिद्धं। तस्मात्तदाकारस्यैवालंबनमिति नान्याकारज्ञानमन्यालंबनमन्यथाख्या
तिरिति केचिद्विरेवोपसंहर्तव्यं॥ अस्तु तर्हि वस्तुनो वस्त्वंतरात्मनावभासत इति। तत्राह अथ तथारूपावभासनमिति॥ न तावदत्यंतभेदवादिनां संसर्गः ॥पर
मार्थः। ततश्चानिर्वचनीयानभ्युपगमाद्वन्यस्यैव संसर्गः प्रकाशेत। तावदेवं खंडो गौरित्यादिसंसर्गप्रत्ययाः सर्व एव विभ्रमाः प्रसज्येरन्निति बाह्यैरेवै
कः पक्षः परिहर्तव्यः। अथ भेदाभेदवादिनां संसर्गस्य सत्त्वाद्भूयात्तत्राह यादि पारमार्थिकमिति। एवं खंडो गौरित्यादिवत्सर्वस्य भेदाभेदान्न चे
न्वेद्विभ्रांतिबाधौ सर्वत्र वा तौ स्यातामित्यर्थः। अस्तु तर्ह्यन्यथापरिणते वस्तुनि ख्यातिरिति। न तदाह युक्तेरेवेति॥ युक्तेः परिणामनिराकरणम
यः स्पष्टार्थः। अथ पुनर्दुष्टकारणजन्याः प्रतीतिरिष्यते नान्यथाख्यातावेव परिणामभेदो निराक्रियते ख्यात्यंतरमनिराकरणं च॥ कथं॥ अत्रा
त्मख्यातिवादी कुर्वन्नेव रजताकारो न बहिरिति। कुतः प्रसंगो व्यतिरेकेण परोक्षत्वाद्बुद्धिमत्। कथं विज्ञानस्य रजताकारः। प्राप्तः। संस्का
रसामर्थ्यादिति वदामः। तथाप्यस्यां ज्ञानसंततौ यदाकदाचित्पूर्वं रजतज्ञानमुत्पन्नं तदेव संस्कार उच्यते॥ न चाविज्ञानजन्योन्यः प्राभिन
स्यामीक्षणलीको वान्यः कश्चिदस्य संस्कारो विद्यते॥ विज्ञानमात्रवादात्॥ स चानेकज्ञानव्यवहितोपि कदाचित्सजातीयं रजतज्ञानांतरमुत्पाद
यति॥ शालिबीजमिवानेकांकुरादिकार्यव्यवधानेन पुनः सजातीयं बीजांतरमिति। अथवा तज्जन्यज्ञानसंतान एव संस्कारः। स च तथाविधज्ञानां १०
तरादिति अनादिवासनाप्रापितं सर्वं प्रतीतिविषयत्वाद्बुद्ध्याकारो बहिर्वदवभासत इति॥ ॥सवक्तव्यः॥ ॥किं तद्रजतं जायते न वेति॥ न चेदं

जायमानज्ञानस्वरूपं न स्यादाकाशवत्। जायते चेन्नार्थात्। अर्थान्तराभावात्॥ अथ ज्ञानादेव दुष्टकरणाद्रजतोत्पाद इति। तद्धाताथ पुनर्दुष्टकारणजन्यायाः प्रतीतेरेव रजतोत्पाद इति नि॥ जनकप्रतीते रजतात्पूर्वकालत्वाद् इतद्विषयत्वात् प्रतीत्यन्तरस्य दुष्टकारणस्य तद्विषयत्वे सर्वप्रतीतीनां विषयत्वप्रसंगाद् दुष्टकारणप्रतीतेश्च रजतजन्यतया तत्प्राक्त्वं चेन्न चेद्रजतस्यार्थक्रियावत्तया सत्त्वप्रसंगात् तज्जन्यत्वे तद्विषयत्वाभावात् प्रतीतमेव रजतं स्यादिति भावः। अन्यथाख्यातिं निराकृत्याख्यातिवादी स्वपक्षमुपसंहरति तदेवं पारिशेष्यादिति॥ अख्यातिदूषणमप्युक्तमनुस्मारयति ननु स्मृतेरिति॥ ननु न स्मृतिर्नापि ग्रहणं चेदलौकिकमिदं ज्ञानं कथमिति चोदयति॥ का तर्हि गतिरिति॥ किं सामग्र्यं पृच्छसि। किं वा ज्ञानं अथ विषयमिति। यदि सामग्र्यं तत्राह नेदमिन्द्रियसाधना। नान्विन्द्रियसंस्कारो चेत्सामग्री सम्यग्ज्ञानमेवेदं स्यात् स्मृतिग्रहणवदिति चोदयति कथमेतदिति॥ दोषसहकृतत्वात् तृतीयमिदं सामग्र्यमिति साध्यते कारणदोष इति। ननु दोषः प्राप्तकार्यस्य प्रतिबन्धको नोत्पादक इति हेतुरिति तत्राह कार्यगम्यत्वादिति॥ न चानादेः कार्यानुदयस्य हेतुर्दोषः कल्प्यः अभावात्॥ किंतु व्याप्त्यादिवद्विपर्ययकार्यहेतुर्दोष इति। ननु दोषः संस्कारोद्बोधकश्चेन्न सामग्र्यान्तर्भवतीति न तृतीयमिदं सामग्र्यमिति तत्राह साचैकमेव ज्ञानमिति॥ नान्विन्द्रियासंप्रयोगादन्तःकरणपरिणामज्ञानमुत्पद्यते। न तद्रजतं तत्संसर्गं वा विषयीकर्तुमीष्टे॥ मिथ्यावस्तुज्ञाने द्वयान्तरादिगतेवा संप्रयोगानुपपत्तेः। जदूकरुन्मीलनान्वयव्यतिरेकयोरपि ज्ञानज्ञानेपक्षयाद् अन्यथासिद्धेः। नापि संस्कारा रजतांशद्वयगमकस्य स्मृत्यनभ्युपगमात्॥ नापि दोषः स्वयमेव कस्यचिद् ज्ञानस्य हेतुर्दृष्टः॥ ज्ञानकारणानामेव कार्यविशेषनिमित्तत्वाद् इतो न रजततत्संसर्गभिन्नं किंचिद्द्वयमेकं ज्ञानं समस्ति॥ किं त्वविद्यैव व्याप्यदोषनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभासाकारेण च परिणममाना स्वकार्यं साक्षिचैतन्यस्य विषयभावं प्रतिपद्यत इति तेषां मतम्॥ तत्र कथमेकं ज्ञानद्वयमिति॥ तत्राहैकफलत्वमिति॥ विषयावच्छिन्नं हि फलमवभासते। न ज्ञानावच्छिन्नं। विषयश्च सत्यमिथ्यावस्तुनोरन्योन्यात्मतयैकतामापन्नस्तेनैकविषयावच्छिन्नफलत्वेकत्वोपाधौ स्वस्य मिथ्याज्ञानद्वयमप्येकमिति रूप्यते इति भावः॥ अथ विषयः कथमिति तत्राह तस्य चेति॥ कुतो रजतमिथ्यात्वमित्यत आह तेन मिथ्यात्वं च नामेति॥ भावाभावज्ञानयोर्मिथ्यात्वप्रसिद्ध्यभावादिदं ज्ञानस्य प्रवाचि मिथ्यात्वमनिर्वचनीयतामेव गमयतीत्यर्थः॥ संप्रयुक्तेऽर्थे संप्रयोगो निरपेक्षो ज्ञानकारणं। संस्कारश्च पूर्वानुभूतस्मृतौ निरपेक्षः। ततश्च निरपेक्षकारणद्वयजन्यत्वाज्ज्ञानद्वयमेतन्निरंतरोत्पन्नमित्यख्यातिवादी चोदयति॥ भिन्नजातीयज्ञानेति॥ ज्ञानभेदे हि निरंतरोत्पत्तावपि न प्रवृत्तिकार्योदयः संभवेति॥ तत्र यथा वर्णेषु ज्ञानेषु क्रमवर्तिषु ज्ञानकार्योदयान्यथानुपपत्त्या पूर्ववर्णसंस्कारसहितमन्त्यवर्णज्ञानमेव हेतुत्वेन कल्प्यते कारणयौगपद्याय। तथा प्रवृत्तिकार्यानुपपत्तिरेव ज्ञानैक्यं कल्पयति किं कारणभेदेनेति परिहरति नैष दोष इति॥ ननु कारणभेदात्कार्यभेदोऽप्यनुमीयत इति नेत्याह रागाद्दृश्यते हीति। ननु तत्रापि कारणभेदात् ज्ञानभेद इति नेत्याह लोभ यत्रापीति। ननु लिंगदर्शनं व्याप्तिस्मृतिश्च लिंगिज्ञा

वि॰ ११

नु॰

तां।

नकारणं न संस्कार इति नेत्याह संस्कारोद्बोध इति॥ ज्ञानद्वययौगपद्याभावादित्यर्थः। तस्मादित्युपसंहरति। ननु प्रत्यभिज्ञायां संप्रयोगः पूर्वानुभूतस्मृतिप्रकारणं ज्ञानद्वययौगपद्यप्रसंगाभावान्न संस्कार इति तत्राह यमेव च न्याय इति॥ ज्ञानान्तरे ज्ञानान्तरोत्पत्तौ व्याप्त्याद्यभावात्संस्कार एव कारणतामित्यर्थः। ननु प्रमाणान्तरे प्रत्यभिज्ञादेरकारतासमाहारे नाभिज्ञात्र स्यक्षे। अभिज्ञाप्रत्यक्षं चेदं रजतज्ञानमिति तत्राह तथाभिन्नजातीयज्ञानहेतुरूप इति॥ न केवलं यत्र संस्कारः प्रमाणकारणेन संबध्यते तत्र स्मृतिगर्भप्रमाणज्ञानमेव दृष्टं न तथेदं रजतमिति तत्राह तत्र लौकिकज्ञान इत्यादिना॥ किंच। ज्ञानद्वयपक्षेऽख्यातावपरोक्षावभासिनः स्मर्यमाणत्वे सर्वत्र प्रतिपन्नोपाधौ विषयसत्त्वाभावेऽन्यथाख्यातौ प्रतिपन्नस्य संसर्गशून्यत्वे पुरोदेशे प्रतिपन्नस्य रजतस्य देशान्तरसत्त्वे वाऽख्यातौ व्याहिरवभासस्यान्तरत्वे वाऽनुभवविरोधः स्यान्न तथास्मत्पक्षे इत्याहैवं च सति नानुभवविरोध इति॥ ननु तवाप्यस्ति प्रतिपन्नस्यानिर्वचनीयत्वेऽनुभवविरोधः समानः। तन्न। इदन्तासंसर्गवद्रजतस्यापि शुक्तिकासत्तासंसर्गोऽयमवभासते न रजतस्यापरं सत्त्वं। अथवा त्रिविधं सत्त्वं। परमार्थसत्त्वं ब्रह्मणः। अर्थक्रियासामर्थ्यसत्त्वं मायोपाधिकमाकाशादेः। अविद्योपाधिसत्त्वं रजतादेरिति। परमार्थसत्त्वापेक्षयाऽनिर्वचनीयमिति नानुभवविरोधः। यथानुभवमर्थसत्ताभ्युपगमात्। यस्माद् भ्रान्तित्वव्यवहारः सदसद्ज्ञानयोरनुपपन्नो यतश्च पक्षान्तरेऽप्यनुभवविरोधो यतश्च ज्ञानद्वयपारोक्ष्यस्मृतित्वस्मरणाभिमानप्रमोषतद्धेत्वविवेकनिमित्तप्रवृत्त्योर्जन्मान्तरानुभूतस्मृतिश्चास्य प्रतिपन्नं च अपूर्वं कल्प्यमख्यातौ अन्यथाख्यातौ चात्र प्रतिपन्नस्यान्यत्र सत्त्वमिति द्वयस्य च जन्मान्तरानुभूतदेशकालव्यवहितार्थस्याहि च दोषस्य च तथाविधादृष्टसामर्थ्यं संसर्गस्य च शून्यस्य प्रत्यक्षतेति प्रमाणविरुद्धं बहु कल्प्यं। अतः सर्वदोषपरिहाराय यथाप्रतिपन्नस्य मिथ्या च नामैकः स्वभावः। नास्ति रजतं मिथ्या रजतं मिथ्यैव रजतं प्रभादित्यनुभवसिद्धः समाश्रयणीयः। अविद्योपादानकल्पनाया अन्वयव्यतिरेकसिद्धत्वादित्याह अतो मायामयमिति॥ सत्यस्य च वस्तुनो मिथ्यावस्तुसंभेदे विभ्रमः समानो मायायां मिथ्यानिर्वचनीयख्यातिरध्यासस्य वायमित्यर्थः। अत्र केचिदाहुः। अतो विद्यामयमिति वक्तव्यं न मायामयमिति। विभ्रमाणां तत्त्वज्ञाननिराकार्यतयाऽविद्यात्मकत्वान्मायाविद्ययोर्भेदात्॥ तथाहि॥ माया स्वाश्रयमव्यामोहयन्ती कर्तरि व्यामोहमनुवर्तते। न तथाविद्या। प्रसिद्धश्च मायाविद्ययोर्भेदो लौकिकानां॥ नहि मायाविनिर्मितं [illegible] अविद्याशब्दप्रयुक्तं जगत इति॥ उच्यते॥ तल्लक्षणाभेदात् लोकव्यवहारसामर्थ्याद्वा तयोर्भेदः कथ्यते॥ न तावत्तल्लक्षणभेदोऽनिर्वचनीयतया तत्त्वावभासप्रतिबन्धविपर्ययावभासतल्लक्षणस्याविशेषात्॥ ननु मन्त्रौषधादि सत्यवस्त्वेव माया नानिर्वचनीया। न। परिदृश्यमानमिथ्यावस्तुन्येव मायाशब्दप्रयोगात् मायाख्यस्य मन्त्रौषधाद्यपरिज्ञाना तत्र मायाशब्दप्रयोगाभावाच्च मन्त्रादेश्च काचादिवन्निमित्तकारणत्वात्। अथ शोधा

११

दानाविद्याप्रकृतिशक्तिशब्दितमायोपादानानिर्वचनीयानादिवस्तुकल्पनात्॥ तत्रमायांतुप्रकृतिमितिश्रुतौ मायाशब्दप्रयोगात्प्रकृतिभूतयो
र्मायाविद्ययोर्विकारयोश्चाध्यासमानयोर्लक्षणाभेदादेकत्वमवगम्यते॥ ननुस्वाश्रयव्यामोहाव्यामोहाभ्यांलक्षणभेदप्रतीतेर्यथाश्र
येइन्द्रजालव्यामुह्यत्स्वेवपार्श्वस्थोमायांप्रपश्यन्नपिअर्थकर्ता। नतस्यमायाविनोव्यामोहाभावः॥ किंतुबाधनिश्चयप्रतीकारज्ञानाभ्यां। अन्यथा
पार्श्वस्थवत्कर्तापिव्यामुह्येदेव॥ अथलोकेस्वाकर्तेशक्यतेमायानतथाविद्येति॥ न। तद्विमंत्रौषधादेर्निमित्तकारणतोक्तेःस्वातंत्र्यान्नमायाया
माविद्यायामप्युक्तत्वेऽप्यन्यवस्तुमोदिनादिवंद्रकेशोंडुकादिभ्रमाःमंत्रौषधादिनिबंधनास्स्वप्नभ्रमाःतत्त्वज्ञानेप्यनुवृत्ताप्रतिभासाश्चकर्तु
रिच्छयानिवर्त्यंते। नचशास्त्रव्यवहारान्मायाविद्याभेदः। तस्यामिथ्यानीयोजनात्तेषेमावाद्वयश्चोतावि श्वमायानिवृत्तिः। इत्यादिश्रु
तौसम्यग्ज्ञाननिवर्त्याविद्यायांमायाशब्दप्रयोगात्॥ तरत्यविद्यांविततांहृदियस्मिन्निवेशिते। योगीमायाममेयायतस्मैविद्यात्मनेनमः
इत्यादिस्मृतौमायाविद्ययोःसामानाधिकरण्येनतत्त्वज्ञानेनतत्त्यक्त्वाभिधानात्॥ मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वादि
तिसूत्रेसूत्रकारैरेवस्वप्नेमायाशब्दप्रयोगात्॥ भाष्यकारेणचाविद्यामाया। अविद्यात्मिकामायाशक्तिरितितत्रतत्रनिर्देशात्॥
टीकाकारेणचाविद्यामायाक्षरमित्युक्तत्वात्॥ ब्रह्मसिद्धिकारेणचैवमेवेयमविद्यामायामिथ्याप्रत्ययइत्युक्तत्वात्तस्मात्स्वेच्छातोक्या
हेतुव्यवहारेचैकत्वावगमादेकस्मिन्नपिवस्तुनिविक्षेपप्राधान्येनमायाच्छादनप्राधान्येनाविद्येतिव्यवहारभेदः। इच्छाधीनत्व
तद्वैपरीत्येनचव्यवहारभेदइतियुक्तमुक्तंमायामयमिति॥ ॥अस्तुतर्हिप्रतिपन्नोपाधावेवयथाप्रतिपत्तिपरमार्थसत्त्वकल्पनागौरवा
द्द्वैतापरिहारादितिचेत् नेत्याहाथपुनरिति॥ ननुकारणदोषवत्तामेवतद्रूप्यमितिनेत्याहमलोनहीति॥ तद्भावेनतत्रेति। सर्वत्रैवपरमार्थरज
तदस्यार्थः॥ आत्माश्रयाविद्यामतेऽपिसर्वैरेवगच्छतेतिनेत्याहमायामात्रेत्यहति। प्रसिद्धमायावदितिभावः॥ इदमाकारावच्छिन्नसाक्षिचैतन्य
समाश्रितस्यरजतस्यशुक्तिकासंभेदोप्याविद्यामेकइरतिस्फुरत्वादिवदनन्यवेद्यत्वमितिभावः॥ ज्ञानस्यैवभ्रांतित्वप्रसिध्यनुपपत्तेःकल्प
नालाघवंचवानुभवाभ्यामनुगृहीतामिथ्यार्थतांतुतांगमयतीत्युक्तं॥ इदानींबाधकप्रत्यक्षंस्वयमेवरजतस्यमिथ्यात्वंप्रतिपादयती
त्याह। किंचनेदंरजतमिति॥ ननुप्रतिपन्नोपाधौरजताभावंबाधोबोधयतिनतस्यमिथ्यात्वमितिचोदयतिकथमिति॥ प्रतिपन्नोपाधावभा
वप्रतियोगित्वमेवमिथ्यात्वंनाम। तच्चबाधकज्ञानेनरजतंप्रतिपन्नोपाधावभावप्रतियोगितयावभासतइतिप्रत्यक्षंमिथ्याहतेनहि
तस्यातिं॥ बाधकज्ञानसिद्धस्यप्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्यमिथ्यात्वस्यपुनःस्वशब्देनपरामर्शाच्चबाधविषयोमिथ्या
त्वमित्याह॥ नेदंरजतंमिथ्यैवेति॥ ननुदेशकालांतरबुद्धिषुसत्त्वादपिरजतस्यैवंबाधःसंपत्स्यतइतिनेत्याह नचतत्केनापि

वि०१२

तां

द्रूपेणेति॥ नेदंरजतंकिंतुतद्रजतंबुद्धिर्वेतिस्यात्परामर्शोनामिथ्यैवेति। स्मृतिग्रहणाविवेकवत्तुवयावाविवेत्यभिप्रायः। ननुकोयंबाधोनाम। अ
न्याधिक्येनोन्यत्रप्रवृत्तिनिरोधः। तर्हियत्ररजतार्थीपरिव्राजकादेःप्रवृत्तेरेवानुदयस्तत्रबाधप्रसिद्धिर्नस्यात्प्रसिद्धस्तत्रापिबाधः। नप्रवृत्तिविच्छेदो
बाधः॥ किंतुप्रवृत्तियोग्यताविच्छेदइतिचेत्तन्न॥ पुनरपितत्रैवरजताविवेकादन्यत्रापिप्रवृत्तिदर्शनात्॥ योग्यतायाअविच्छेदात्। उदकज्ञानाच्चवर्त्तमानस्यसर्पचो
रादिदर्शनेनप्रवृत्तिनिरोधेसर्पादिज्ञानादुदकज्ञानस्यबाधप्रसिद्धिःस्यात्। अविविक्ततयाप्रतिपन्नस्यविवेकोबाधइतिचेत्॥ सर्वप्रमाणेष्वप्यप्रमयमविवि
क्ततयाप्रतिपन्नेष्वपश्चात्तनेतरेतरापेक्षयाभेदज्ञानेसर्वत्रबाधःस्यात्॥ नचपदार्थज्ञानमेवभेदज्ञानं। गृहीतमात्रस्यस्मृतिभेदेऽविवेकाभावप्रसंगात्। ॥
इत्युक्तं॥ अन्यात्मनाप्रतिपन्नस्येतरेतरभावप्रतिपत्तिर्बाधइतिचेत्॥ घटकोपघटइतिप्रतिपद्यघटस्यगौणत्वंनद्रव्यंगुणइतिज्ञानंसर्वत्रबाधःस्या
न्नतथाप्रसिद्धिरस्ति॥ समानोचसर्वत्रभेदाभेदावितिचैकंप्रतिपद्यभेदप्रतिपत्तिःसर्वत्रबाधःस्यात्॥ नचज्ञानस्यप्रध्वंसोबाधःस्वयंक्षणि
कत्वात्॥ अर्थस्यचसंशुद्धिप्रबोधस्यान्यस्यज्ञानेनप्रध्वंसायोगात्॥ बाधस्यचलोकप्रसिद्धत्वात्तस्मान्नबाधंपश्यामः॥ उच्यते। अज्ञानस्यस
कार्येणावर्त्तमानेनप्रविलीनेनवासहज्ञानेननिवृत्तिर्बाधस्तथाविधानवबोधनिवृत्तौबाधप्रसिद्धेरिति॥ स्मृतिरूपशब्देनकारणत्रितयजन्य
त्वमुक्तं। तच्चकारणत्रितयजन्यत्वान्यस्यान्यात्मतावभासोलक्षणंदर्शितं। तदिदंलक्ष्यंनव्याप्नोतीतिचोदयति। ननुनव्यापकमिति। कथंलक्षणंरा
स्याभावइतितच्चाहनहिस्वप्नज्ञानेकाचाविति॥ संप्रयोगस्यकरणांशस्याधिष्ठानांशस्यवाभावादित्यर्थः॥ कस्तर्हिस्वप्नइतितदाहातएवेति। तत्रवास
नाजन्यस्मृतिमात्रत्वेभ्रांतिप्रसिद्धिर्गवयादिस्मृतिवन्नस्यादितिपरिहरति। नतावत्स्मृतित्वमिति॥ ननुकारणत्रितयाभावान्नज्ञानांतरमपीत्याह ननुस्म
तिरूपत्वमपिनेति॥ कारणत्रितयजन्यत्वमन्यस्यान्यात्मनावभासंचसंपादयामीत्याहश्रोच्यतइति॥ संप्रयोगाभावादपरोक्षावभासित्वाद्ग्रहण
स्मृतिमात्रत्वप्रयुक्तेतीयमिदंविज्ञानंस्वयमेवात्मनोध्यासलक्षणांगमयितुंसमर्थमितिवदितुंप्रकारांतरंपर्यदस्यस्युक्तमेतादिति॥ स्वप्नप्रपंचेविपरी
तप्रमात्रादिविज्ञानसाधनस्यांतःकरणस्यनिद्रादिदोषपूर्वानुभव[illegible]संस्कारसहितस्यासंप्रतिपन्नकारणत्रितयत्वाद्युक्तंस्मृतिरूपत्वंभ्रांतिज्ञान
मित्याहतदिहतद्वहानिद्रादिदोषोपप्लुत[illegible]मिति। कथंपरत्रपरावभासइति॥ तदाहतस्यचेति॥ निद्रादिदोषेणसंस्कारोपप्लुतेनांतःकरणेना
मिथ्यासनिमित्तकारणोनावच्छिन्नचैतन्यस्थाविद्याशक्तिःपुष्कलनिमित्तकारणासंसर्गाध्यासंप्रतिपुष्कलकारणमंतामात्राधर्मानामिथ्यार्थालं
बनाकारेणविवर्त्ततइतिचैतन्यमेवस्वाविद्ययाविवर्त्तते॥ अतःसत्यस्यवस्तुनोमिथ्यार्थालंबनाकारेणवस्तुसंभेदावभासलक्षणःपरस्परा
वभासोविद्यतइतिभावः॥ तथाजागरतोपिबाह्याधिष्ठानांशासंसृष्टांतःकरणावच्छिन्नतयाबाह्याधिष्ठानसंसृष्टचैतन्यस्थाविद्याशक्तिर्बा १२
ह्याधिष्ठानसंसृष्टरजताद्याकारेणविवर्त्ततइति शुक्तिकाद्यवच्छिन्नंचैतन्यंरजताद्यालंबनामितिबोध्यालंबनंरजतादिकथ्यते॥ सर्वत्र

पतन्यमेव साक्षी दृश्यावच्छिन्नतया वा विभ्रमालंबनमिति कुतः परत्र परावभास इत्यर्थः॥ आकाशवत्सर्वविषयोपरक्ततया सर्वत्रावभासमानमात्मानमना
द्यस्मिन्नेवावच्छिन्नमात्मानमनुपादाय चोदयति॥ नन्वेवं सत्यंतरे वेति॥ आसे वाधिष्ठानं चेदिदं रजतमितिवदहं नील इत्येव स्वच्छप्रपंचो भायादित्य
र्थः॥ निष्कृष्टाहंकारं चैतन्यमात्मानमादाय चेत्स्य चाचित्सामानाधिकरण्यावभासमंगीकृत्य परिहरति कोवा अंत इति॥ पुनरप्यहंकारावच्छिन्नमात्मानमादा
य चोदयति नन्ववच्छिन्ने देशा इति॥ इदमपि पृथक्त्वे इत्यर्थः॥ पृथक्त्वावभासोप्यंतरेवेत्याह नन्वदेशोपीति॥ अनवच्छिन्नचैतन्यसंसृष्टतये च भेदाव
भासोपीति भावः॥ पुनरप्यहंकारावच्छिन्नमादायाहं भेद इत्यपि प्रतीत्यादिस्याह न्यायमपीति॥ निगूढाभिसंधिरेवं पूर्वमुक्तरमुक्ते शंकिनि सर्वतो विप्रसृ
तं चैतन्यं सर्वत्र प्रकाशमानमात्मानं स्पष्टीकुर्वन्नाह न दोषो जागरतोपीति॥ प्रातिभासिकभेदमंतरेण प्रमाणतो नामेद्यत इत्यर्थः॥ न चाहमवच्छि
न्नचैतन्यान्यान्येव विषयसंगता। नै चैतन्यानि किं न स्फुरिष्यत आह अन्यथा जडस्याति। स्वयं चैतन्यत्वीनाविषया आत्मावगतिप्रकाशो नाजिन संसृज्यंते चे
न्मयावगता इति संबंधावभासो न स्यादित्यर्थः। सर्वत्र चैतन्यावगुंठनेपि अहमिदमिति चात्मानात्मानौ विविक्ताविति प्रतिभासः कथमिति तत्राह यः पुनरिति॥
ननु चैतन्यमेव सर्वत्रांतर्बहिर्भेदादिरूपेणावभासते चेत्कथं तस्याखंडाद्वितीयतेति चेत्सभेदोपरागनिमित्तभेदमंतरेण स्वरूपभेदानवगमादित्या
ह तस्य चानिरंशत्वेति॥ निरंशद्रव्यस्याणुत्वमनंतत्वं वा स्यान्मध्यमपरिमाणं चेदहं चैतन्यं सर्वत्रावभासते॥ न च निरंशं मध्यमपरिमाणमिति परोपा
धिपरिमाणं चैतन्यमित्यर्थः॥ जागरतोप्येवं॥ किमुत स्वप्ने स्वप्नस्य चैतन्याधिष्ठानं चेत्यर्थः॥ केवलस्य मनसो बहिः प्रत्यक्षसाधनत्वाभावान्नर।
अथवेत्यंगीकारवादः) अव्याप्तिः परिहृता। इदानीं मिथ्याध्यासभ्रांत्यविद्योधं प्रसिद्धभावेप्यन्यस्यान्यावभासो विद्यत इति लक्षणस्यातिव्याप्तिमाह
कथं तर्हि नामादिष्विति॥ अन्यस्यान्यात्मना ज्ञानमध्यासस्य लक्षणतो इयं चान्यस्यानपच्यमानसी क्रियेयति व्याप्तिं परिहरति सत्यमतरवे चोदनावशादि
ति॥ ननु ज्ञानमेव तत्र विधीयत इति नेत्याह नहि जानामीति॥ विधिजन्यपुरुषप्रयत्ननिरपेक्षमेव सर्वज्ञज्ञानस्य पुष्कलकारणामनिदृत्तोपि अ
निस्सज्ञानस्य दर्शनात्तो विधानान्मानसी क्रियेति भावः॥ ननु स्मृतिज्ञानामि सा रम्यतं केचिदित्यतः प्राक्तनो ग्रंथः स्पष्टार्थः॥ नन्वध्यासे वादिविप्रति
पत्तिदर्शनान्नैकरूपेण लक्षणं व्यवस्थापयितुं शक्यत इत्याशंक्याधिष्ठानाध्यस्यमानयोः स्वरूपतत्त्वदेशकालादिविशेषपरे वादीनां विप्रति
पत्तिरन्यस्यान्यात्मतावभासमात्रे तन्न अतो नातिप्रसक्तिः प्रतिपत्तिस्तल्लक्षणं लौकिकसामान्यविशेषादिसंसर्गप्रख्यानाभ्रमत्वापाद्विपरिहराय
सत्यमिथ्यावस्तुसंभेदावभास इति वक्तव्यतां संगीकृत्य मतांतराण्युपन्यस्यति तं केचिदित्यादिना॥ प्रथमस्त्वात्मख्यात्यन्यथाख्यातिविशेष
योर्द्वितीयस्य ख्यातेस्तृतीयस्य प्रोक्तेः स्वाभावत्तो मनाः ख्यातिरिति ख्यात्यख्यात्यन्यथाख्यातिविशेषयोरुपन्यासः॥ कल्पनामित्यस्य
व्याख्या। विद्यमानस्यैवावभासमानतामिति॥ यत्रोक्षणमवादि बौतिपूर्वलक्षणशब्देन यच्छब्दस्य संबंधः॥ अख्यातिवादिनापि मानं संसर्गज्ञा

वि॰१३

नं संसर्गाभिमानो वा अवगम्यत इत्यभिप्रायः॥ ननु स्मृतिरूपतयाकारणाचितयजन्यत्वमुक्तोद्देशेनमिति नेत्याह पूर्वदृष्टत्वेति॥ नन्वविद्यादिदोषप्र
र्वभ्रमसंस्काराभ्यामेव पदार्थमात्रज्ञानानि जायमानानि विभ्रमाः न स्वयं वस्तु तत्संप्रयोगादिप्रमाणकारणतां वापेक्षते विभ्रम इति परत्रेति पदमावि
बाधितमिति प्रत्यन्यवादी मन्यते॥ तत्राह स्मृतिरूपः पूर्वदृष्टावभासः इति। न पदार्थमात्रज्ञानं विभ्रमः प्रत्यन्यस्यापि तभावात्प्रसंगात्॥ किंच
न्यजान्यज्ञानं। ततश्चाविभ्रमेपि पदार्थज्ञाने लक्षणाव्याप्तेर्निरूपपत्तिकत्वमिति॥ कथं निरूपपत्तिकोयमित्यादिग्रंथः स्पष्टार्थः। ननु संविद्रजो
तयोरितरेतराधिष्ठानत्वेन साधिष्ठाने भ्रमे संभवति न तृतीयस्य सत्यस्य स्ववस्तुनोधिष्ठानत्वकल्पना कुत इति चोदयति। ननु रजतसंविदिति
नन्वध्यस्यमानव्यतिरेकेणाधिष्ठानस्य सिद्धिर्वक्तव्या। तत्रेतरेतराधिष्ठानत्वे सति इतरेतरापेक्षासिद्धिः स्यादसमंजसं स्यादिति तत्राह बीजांकु
रवदिति॥ न बीजांकुरादिष्वितरेतराश्रयता॥ किं तु कारणतापरंपरयानवस्थेति परिहरति नैतत्सारमिति॥ नान्वियापि कारणपरंपरेति नेत्याह पू
नर्थस्यामिति॥ नान्वेतावतापि रजते संविद्रजतं पूर्वस्यां संविदि स्याच्च स्वविषये स न पूर्वसंविदीति परंपरामेव कल्पयामीति चेन्न॥ यदिति
वत्पूर्वपूर्वमुत्तरोत्तरस्यान्वितत्वेनाधिष्ठानं स्यात्ततः पूर्वपूर्वस्योत्तरोत्तरस्मिन्नध्यासे युगपदवस्थानात्तरेयातिकत्वतानि। न तु बीजांकुराव
न्योन्योपादानत्वेपि न युगपदवस्थानं दृष्टमिति तत्राह बीजांकुरादिष्वपीति॥ अभिमतवस्तुसिद्धिरन्वयिकारणत्वसिद्धिरित्यर्थः। अनन्वितेषु बीजादिषु न्व
यिकारणताकांक्षायात्मानिवृत्तत्वादित्यर्थः॥ अतोन्वयिद्रव्यमेव तत्राप्युपादानं न बीजादेरन्योन्यनिमित्ततेति भावः॥ इत्यपि ताहि पूर्वस्योत्तरं प्रत्यनन्वितत्व
नैवाध्यासनिमित्तता बीजादिवदिति नेत्याह कुत इदमेवमिति पर्यनुयोगे दृष्टत्वादेवमिति॥ अयं भावः॥ बीजांकुरयोः कार्यकारणभावस्य दृष्टत्वात् दृष्टेपि
तयोरेव कार्यकारणतापरंपरा दृष्टपरंपरत्वान्नानवस्थादोषमावहति। संविद्रजतयोरधिष्ठानाधिष्ठेयतया निमित्तनैमित्तिकभावस्य प्रथममेव कल्प्य
त्वात्तयोरेव पूर्वपूर्वनिमित्तनैमित्तिकभावकल्पनात्त्वंधपरंपरैव स्यादिति॥ दृष्टिपरंपरामेव दर्शयति॥ दृष्टत्वादेवमिति॥ तत्रैव दृष्टं वेति॥ नानवस्था
द्रोपमातिवर्त्तत इति अंधपरंपरामेवेत्यर्थः॥ द्व्याकारावभासत्वात्सर्वभ्रमाणां परत्रपरावभासत्वं भ्रम इत्युक्तं॥ ज्ञोरितिज्ञानप्रातिप न विषयेथोंयं
ज्ञांतरासावबि। शेषांशांतरज्ञानस्य बाधकत्वाच्चेत्साधिष्ठानो भ्रम इत्याहापि च न कश्चिदिति॥ न चानुमानात्तत्वं च नाभ्यां सर्पाभावमात्रमपि कदा
चिदूष्यते न तद्भावविशिष्टांशांतरमिति तत्राह यद्यप्यनुमानादिति॥ तत्राप्यभावविशिष्टवस्तुमात्रं गृह्यते। विशेषाकांक्षाभावादिति भावः॥ नो
नुप्रधानं नास्ती स्यादेन तद्भावावि। वीष्ट वस्तुतरंगत्यते तेषामन्यज्ञानध्यस्तत्वादिति तत्राह प्रधानादृष्टपीति॥ अथवा सर्वभ्रमावभासेषु बाध
कावभासेषु च साक्षिचैतन्यस्यात्तं च न स्याविद्यमानत्वात्तत्रांकयमाननिरधिष्ठाननिरवधिकभ्रमबाधेपि साक्ष्येवाधिष्ठानमबाधे सिद्धं विद्य १३
तइस्माद्वा सर्वं लोकसाक्षिकमिति॥ नन्वेवं बाधया ज्ञानस्याविबोधात्क्रमबाधे तद्वभासि साक्षिचैतन्यमपि बाध्येतेति तत्राह तद्बाध्ये

तदनुपपन्नमेवेति॥ अधिष्ठानत्वेनापि पारिशेष्यादिति भावः॥ अत इत्युपसंहारः॥ तदेवप्रपंचयति तेन तन्मात्रस्येति॥ साधिष्ठानभ्रमसाधनप्रसंगेना
ध्यस्तस्यापि शून्यवत्तां निराचष्टे॥ नाध्यमप्यसदिति॥ अस्य शुक्तौ रजतमिति विशेषप्रतिभासायोगप्रसंगादिति भावः॥ प्रतिभासमात्रनिराकरणे शून्यं न
भासत इति वाक्यस्य बाधकत्वप्रसंगात्॥ नन्वध्यस्तं सर्वं शून्यमेवेति तेन मतमिति चोदयति॥ नन्विति॥ शून्याद्यावृत्तेरपि भ्रमस्य कल्पितत्वे स्यादिति कर
वैवमाहेति॥ सद्व्यावृत्तिमात्रं भ्रमस्यासत्त्वं नाम न शून्यत्वं॥ निषेधप्रतियोगित्वादिति भावः॥ ननु भ्रमस्य स्वकाले ऽनिर्वचनीयस्यापि बाधादूर्ध्वं शून्यस लै४
मविशिष्टमिति शंकते यद्यपुनरिति॥ सर्ववादिनां सर्वं वस्तु स्वकाले विद्यमानमपि विनाशादूर्ध्वं शून्यमेवेति संमतमतो न दोष इत्याह कामुमिति॥
ननु भवतु नाम सर्वस्य वस्तुनो विनाशादूर्ध्वं शून्यता। न विभ्रमगृहीतं वस्तु बाधादूर्ध्वं शून्यं भवति किंतु देशांतरादिगतमिति चेत्तत्र किं बाधक
ज्ञानमेव रजतादेर्देशांतरसत्त्वं गमयति॥ किं वेह बाधानुपपत्तिरिति॥ न तावद्बाधकज्ञानमित्याह तथा च बाधकज्ञानमिति॥ नेदं रजतं किंतु
देशकालांतरे ऽस्तीत्येवं समनवगमादिति भावः॥ यावदभिधानसामर्थ्यं हि वाक्यमर्थं प्रतिपादयति॥ देशांतरवर्त्तित्वं च नाभिहितं न वाक्यार्थ इत्यर्थः॥
एवं सति प्रतिपन्नस्य वस्तुनो बाधोऽन्यत्र सत्त्वमंतरेणानुपपन्न इत्यर्थापत्त्या वाक्यं गमयिष्यतीति नेत्याह नार्थापत्त्येति॥ अन्यथाख्यातौ निषिद्ध
स्यसंसर्गस्याख्यातौ वाहि शुक्त्यस्यवान्यत्र सत्त्वमंतरेण निषेधदर्शनाद्दृष्ट्वा तावपि चैत्रच्छिन्नविच्छेदे सर्वस्वदानकर्त्तव्यता दृष्टा चैत्रच्छि
च्छेदांतरनिमित्तादृष्टतायागसमाप्तिविज्ञानबाधितायां न सर्वस्वदानकर्त्तव्यतात्र प्रतिपन्नान्यत्र सतीति कल्प्यते॥ प्रवृत्तिरेव तत्र निरुध्यत
इति चेत् न। प्रवृत्तिनिरोधो न बाध इत्युक्तत्वात्॥ यागादिषु चैवं वर्त्तमानस्य राजचौरादिप्रतिबंधनिश्चयात् प्रवृत्तिनिरोधेपि यागादेरुक्तो बाध
प्रसिद्ध्यभावात्॥ सत्यां चाबाधितकर्त्तव्यताबुद्धौ यदाकदाचित्प्रवृत्तिसिद्धेः॥ किंच लोकेपि प्रतिपन्नोपाधावेव यस्य निषेधस्तस्यापि
विधोपाधिसजातीयोपाध्यंतरे सत्त्वं न कल्प्यत इत्याह भग्नघटाभाववदिति॥ यथा प्रतिपन्नदेशे निषिद्धस्य घटस्य न देशांतरे सत्त्वं
एवं प्रतिपन्नदेशकालवस्तुसर्वोपाधौ निषिद्धस्य न प्रतियोगित्वेनाप्रतिपन्नसर्वोपाधौ सत्त्वसिद्धिरित्यर्थः॥ ननु कथं सर्वत्र शून्यस्य बाधनिपात्तेरि
ति तत्राह तावन्मात्रेणापि तत्सिद्धेरिति॥ अत्रैवानिर्वचनीयमिथ्यावस्तुसद्भावमात्रेणापि तस्याः प्रतीतेः सिद्धेरित्यर्थः॥ ननु पूर्वं रजतमभूदि
दानीं नेति घटवत्कालभेदेन निषेधः स्यात् न। लौकिकपरमार्थरजतस्यात्र कालत्रयेपि शून्यत्वात्तद्रूपेण योग्यानिरूपाधिकनिषेधासिद्धेः॥
निरूपाधिकनिषेधसामर्थ्याच्च प्रतिपन्नं मिथ्यारजतमिति बाधानंतरं परामृश्यते मिथ्यैव रजतमभादिति॥ अन्यथा कालभेदे सति अरजत
मेव स्यात्। नायं सर्प इत्यभावमात्रप्रत्ययप्रतिपत्तिर्न देशांतरे सर्पसत्त्वं गमयति॥ किंतु वक्तव्यं रज्जुरियमित्यधिष्ठाने पर्यवसितात्प्रतीतिनिक
न्यपयतीति दर्शयति॥ यत्रापि सर्पबाधपूर्वक इति॥ तदेवमित्याद्युपसंहारः॥ यद्येवं परत्रेत्यादिः स्पष्टार्थः॥ सन्न॥ विस्पष्टार्थमित्यस्यायम

वि॰१४॥ र्थः॥ स्मृतिरूपत्वेन किं संस्कारजन्यत्वं पूर्वानुभवसंभेदेनास्मरणात् साइत्यं भ्रांतेरभिधीयत इति॥ विशये संस्कारजन्यत्वमेवेति स्पष्टीकरणार्थं पूर्वदृ
ष्टस्यावभासो न दर्शनस्येति॥ पूर्वदृष्टसजातीयस्येत्यर्थो ऽनिर्वचनीयरजताभ्युपगमात्॥ भ्रांतिश्चेत्सत्यस्य वस्तुनो मिथ्यावस्तुनि संभेदावभासो ऽन्यथा
तिप्रसंगादित्याद्यायाशंकाकरोति हिता॥ लोकानुभवसिद्धत्वादध्यासस्य तथापि युक्त्या न प्रयोजनमित्याह तथा च लोकोनुभव इत्यादिना॥ ननु शुक्तिके
कारजतवादिति वचनं न भ्रांत्यपेक्षयोपपद्यत इदं रजतमित्येवावभासनात् न बाधापेक्षया तत्र वत्कारणाभावादिति चोदयति॥ ननु नशुक्तिकेति॥
बाधकज्ञानापेक्षया शुक्तिकारजतमवभासत इति लक्षणाप्रदर्शनं। बाधकज्ञानाविषयतयावात सामर्थ्यं न वा। सिद्धस्याध्यासमिथ्यात्वस्य लक्षण
तावच्छब्देनाभिधानमिति लक्ष्यलक्षणासंगतिरनेन तत्र प्रदर्श्यत इत्याहोच्यते इति शुक्तिकाग्रहणमिति॥ ननु मिथ्यारजतमिति विशेषणादन्यत्र सत्यरजतं व
क्तव्यमिति नेत्याह मिथ्यात्वमपि रजतस्येति॥ स्वरूपपरं विशेषणं नान्यव्यावृत्तिपरमित्यर्थः॥ ननु रजतस्य मिथ्यात्वे तद्वदेव स्यादिदंताया अपि मिथ्यात्वात्सर्वमिथ्यात्वे
निरधिष्ठानताप्रसंग इति। नेत्याह तत्रासंप्रयुक्तत्वादिति॥ कथं तस्यासंप्रयुक्तस्य रजतस्यापरोक्षत्वे ते अत आत्मापरोक्षावभासस्त्वेति॥ उदाहरणद्वयस्य
तात्पर्यमाह तत्र शुक्तिकोदाहरणेनेत्यादिना॥ अस्मदर्थ इमिति प्रतिभास इत्यर्थः॥ प्रतिभासतो युष्मदर्थत्वाभावेपि। चिदवभास्यत्वं नाम युष्मदर्थत्वलक्षणमस्ती
त्याह॥ तदवभास्यत्वेनेति॥ अद्वितीयचैतन्यप्रकाशात्मनि दृश्यमहंकारादिसंघातस्याध्यस्तत्वादध्यस्यमानव्यतिरिक्तमधिष्ठानमध्यासाधिष्ठानया
व्याप्यविषयं प्रमाणज्ञानं द्रष्टा चेति त्रितयमात्मन्येवेति वक्तव्यं॥ ततश्चाधिष्ठानगतप्राप्तो द्रष्टृदोषः प्रमाणागतदोषो वा सर्वदोषजातमात्मन्ये
वेति वक्तव्यं॥ तदभावश्चैतन्यस्याध्यासविषयज्ञानस्याजन्यत्वात्कारणत्रितयजन्यविज्ञानस्यात्मन्यनाध्यासे ऽसंभवादगृहीतविशेषस्य सामा
न्यग्रहणात्स्याधिष्ठानत्वनिमित्तस्य चासन्यसंभवाच्च परत्रे संयोगान्नाध्यासलक्षणं बहिरुक्तमप्यात्मनि संभवतीति चोदयति॥ ननु बहिरर्थ इत्यादिना
च्यत इत्यतः प्राक्तनेन ग्रंथेन॥ नन्वितापि बाहिरर्थवदगृहीतविशेषत्वमर्थत्वसामान्यादनुमीयतामिति नेत्याह नन्विति कारणांतरायत्तेति॥ ननु स्वभावा
वभासेपि संवेदनवदगृहीतविशेषोंशोपि स्यादिति नेत्याह॥ निरंशत्वादस्येति॥ मध्यमपरिमाणानिराकरणादाकारनतो वा सास्यानित्येति इति॥ ननु नित्यं
चोपाकारावन्नकारत्वेनावभासत इति तत्राह॥ स्वयंज्योतिष इति॥ यावत्सत्त्वमवभासमानभावादित्यर्थः॥ कुतः॥ अत्रायं पुरुषः स्वयंज्योतिः॥ आत्मैवास्य
ज्योतिरित्यादिश्रुतेः॥ ननु ज्योतिरिति प्रकाशगुणमात्रेणाभिधीयते आत्मनो गुणत्वप्रसंगात्॥ अतः प्रकाशगुणवद्द्रव्यं ज्योतिरिति जन्यज्ञानेना
पिप्रकाशो नाम प्रकाशा~~त्मकत्व~~ गुणा इति ज्योतिरात्मेति न विरुध्यते॥ नेतत्सारं॥ सर्वभावानामन्यनिमित्तप्रकाशसंसर्गेऽत्यादृश्य॥ आत्मन्यपि तत्प्रसं
गानिवारणाय स्वयंज्योतिर्विशेषणोपपत्तेरात्मैवास्य ज्योतिरित्येवकाराच्च॥ ननु कारणांतरानपेक्षतया स्वयमेव स्वात्मनि ज्ञानं जनयतीति वि १४।
शेषणं किं न स्यात्। न। ज्योतिष्पूर्वस्य न विशेष्यत्वात्॥ तत्र कारकत्वस्य विशेषत्वे तयातिप्रसंगात्॥ किंच ज्ञानजन्मप्रयुक्तत्वे कारणापेक्षायास्त
दभावपदेशेन नास्ति॥ ननु ज्ञान प्रयुक्तं जन्मापि विद्यते। न प्रकाशगुणाप्रयुक्तमेव॥ द्रव्यजन्मव्यतिरेकेण स्वद्रव्योपाधौ जन्माभावस्य प्रदीपादि

द्वष्ट त्वाद्यपि ज्योतिःशब्दात्मनि प्रकाशगुणतास्वजन्माभावनिबन्धनयान्यच्चांतःकरणेऽपि प्रकाशगुणो दृष्टो ज्ञानपरिणामः स्वभावतस्य प्रकाशगुणताव दृष्टंतःकरण
द्रव्यस्यैवावि नोपपरिणामस्य ज्ञानत्वाभ्युपगमात्॥ न च ज्ञानमपि क्वाचित्जवदृष्टं दृष्टमंतःकरणस्येति चेन्न ज्ञातुरर्थप्रकाशात्मस्य ज्ञानत्वाभ्युपगमा
तस्य चात्माश्रयत्वादंतःकरणपरिणामे ज्ञानत्वोपचारान्न च ज्ञानमात्माश्रयं द्रव्यमिति युक्तं। तस्यैव प्रकाशगुणत्वेनात्मनो ज्योतिष्ट्वानुपपत्ते। जडप्र
काशगुणतो जन्यास्मित्प्रकाशगुणो जन्य इति चेन्न। प्रकाशत्वप्रयुक्तत्वाल्लद्रव्योपाधौ जन्माभावस्य दर्पणादौ विद्यमानत्वात् प्रकाशस्यैव निरोधा
नमिति निराकरणं क्रियते॥ प्रदीपादिषु तद्द्रव्यमेव जायते न प्रकाशगुणः। प्रज्ञानघनशब्दाच्चैतन्यज्योतिरात्मा न जडज्योतिरिति गम्यते॥ विज्ञानमात्रेणं दृष्टप्र
सिध्याद्विवचनाज्ज्ञानमिति ज्ञातत्वमुच्यते न भावार्थ इति चेन्न। भावे प्रसिद्धिविरोधात् न च युष्मत्किं चित्क्षणिकं प्रकाशगुणताकल्पना दूरमेकस्यैव
गुणत्वस्यावि चेकल्पनमात्मनि प्रकाशगुणव्यतिरेकाभावाच्चेनागं तत्कत्वे प्रमातेति। नन्वात्मन्यप्रमाणविरोधात्वमनुभवसिद्धमिति चोदय
तिनन्वप्रत्यक्षस्वरूपमिति॥ तर्हि शुक्तिकायामिव अज्ञातत्वेनानवभासाविपर्यययोः स्यातामात्मनि जीवेऽप्याह न तदवभासनादिति॥ ननु कार्यकारणभावहीन
योर्द्रव्ययोः सामानाधिकरण्यमेकद्रव्यनिष्ठं सोऽयं देवदत्त इतिवदतो द्रव्यैकत्वाज्जीवगतावेदानवभासविपर्ययाविति चोदयति नन्विति न ब्रह्मणोऽन्य
इति॥ तर्हि ज्ञानप्रकाशतिरोधाना ज्ञाश्रयेविषयमेज्ञाभावाच्चेनाज्ञातत्वाभ्युपलताइत्यात्रि वंतर्हीति॥ तत्राद्वितीयाधिष्ठानब्रह्मात्मनि प्रमाणस्यचै
तन्यस्या। विज्ञाकारणदोषसंसर्गं प्रथमं दर्शयति उच्यते विचतरवेति॥ प्रसक्षानुमानार्थापत्ति प्रदर्शितात्मज्ञानस्य श्रुतितदर्थापत्तिभ्यां
प्रदर्शनं क्रियते॥ श्रुतिस्तावदिति॥ सुषुप्ते मिथ्याज्ञानाभावात् तत्संस्कारस्य चाप्रतिबंधकत्वात्कामक्रोधाचिकंग्यकृताभावेस्य च स्वतःसिद्धग्रहण
विरोधित्वाभावात्स्वरूपचैतन्येनैव ब्रह्मस्वरूपावभासप्राप्तेतदवभासप्रतिबंधनिमित्तमन्येतद्दर्शयति अन्तेन हि प्रत्यूढाः। तदिमे सत्याःका
माऽनृतापिधाना इति। ततश्च मिथ्याज्ञानसंस्कारागकृतकर्मभ्योव्यतिरिक्तमनवभासनिमित्तमनृतं मिथ्यावस्तु सिद्धं। अनीशया शोचति मु
ह्यमान इति। स्वभावासिद्धेश्वरस्यानीश्वरत्वं तदज्ञानात्प्रतिपत्तेरेव वस्तुनोपन्नपायात्। ततश्चेश्वरभावाप्रतिपत्तिः शोकस्य च निमित्तं मोहं दर्शयति।
अविद्यायामंतरे विद्यमानामुपाकसंतरं वभूवानीशीरेणाप्रावृता जल्पा चासुतृप्रथक्वर्यशास्त्रचरंतीति। नीहारंतमज्ञान
मित्यनर्थांतरं॥ तेनप्रावृतत्वमेव जीवानां ब्रह्मोपरिज्ञाने जल्प्यत्वाद्यध्यासे च निमित्तं दर्शयति॥ तथा अविद्यायामन्तरे वर्तमानाः नान्यत्वेयवेदयां
ते प्रमूढाः इति श्रेयोरूपब्रह्मापरिज्ञाने क्रियाकारकाद्यध्यासे चानिमित्तभूतामविद्यां दर्शयतीत्याद्याः। अज्ञानेनावृतं ज्ञानं तेन मुह्यंतीत्याद्याः
स्मृतयोऽपिद्रष्टव्याः। अर्थापत्तिरपि ब्रह्मज्ञानाद्बंधनिवृत्तिः श्रूयमाणा ब्रह्मप्रागनवबोधोध्यासबंधहेतुरस्तीति कल्पयतीति इयन्नब्र
ह्मानुपपत्तिरयथा दृष्टव्यस्यादि दर्शनविधानानुपपत्तिर्वा प्रागनवगमस्मंतरेणेति जीवस्य ब्रह्मस्वरूपानवभासनिमित्तं जीवानाश्रयाध्यासबंधहेतुरज्ञा
नेऽबोधो विद्यत इत्युक्तं अपि च साक्षिवेद्यस्याज्ञानस्य प्रमातीरभावव्यावृत्तिः प्रदर्श्यते इति न तस्य प्रमाणावेद्यत्वप्रसंग इति॥ तन्न चैदयति॥

वि० १५

नै
नन्वजीवोऽब्रह्मणो ब्रह्मतोऽन्य इति॥ किमत्र जीवब्रह्मणोरेकत्वात्पर्यनुयुज्यते किमेकत्वादाश्रयविषयमेवानुपपत्तिः किं वा चित्स्वभावस्याविद्याश्रयत्व
विरोधोऽब्रह्मणो वा सर्वज्ञत्वादिहानिरिति। न तावदज्ञानमाश्रयविषयसापेक्षं किं चैकस्मिन्नेव वस्तुन्याश्रयमावरणं चेति कथयद्युपसंपादयति स्वा
श्रयापवरकप्रदेशैकस्य द्वयं संपादितमोवदक्रियात्मकत्वादावरणत्वाच्च। नाहि तमोवस्तुद्वयापेक्षमवभासते अज्ञानमिति च द्वयापेक्षं ज्ञा
२ नपर्युदासेनाभिधानात् द्वयसापेक्षवदवभासते॥ यथा स्वितिगमनशब्देनाभिधीयमानाकस्य किं विषयमगमनमिति कर्मसापेक्षवद्भाति तद्व
त्तमोवच्च स्वाश्रयावरणात्मकज्ञानं स्वाश्रयैकत्वेन नाविरुध्यते। नापि स्वाश्रयाच्चित्प्रकाशेन विरुध्यतेऽज्ञानं॥ स्वावभासकेनाच्चित्प्रकाशेनाज्ञानस्यावि
रुद्धत्वात्॥ साक्षिचैतन्यस्य चाज्ञानावभासकत्वाद्दर्शनात्। चिदाश्रयत्वविरोधः॥ किं च जन्यज्ञानेनात्मन्येवस्यान्येवभासमानस्य वस्तुपरविषयाज्ञाना
श्रयत्वं सर्वैरेवोपगंतव्यमिति नावभासमाने अज्ञानाश्रयत्वविरोधः॥ न च स्वप्रकाशमात्रमज्ञानाविरोधि॥ स्वज्ञानेऽभावात्॥ न च स्वयंप्रकाशमानेऽज्ञा
नसंसर्गविरोधः॥ क्वचिद्दृष्टः॥ विषयाणां परप्रकाश्यानामेव तत्संसर्गविरोधात्॥ संवेदनस्यात्मरूपत्वाद्धेचेतदाश्रयाज्ञानोपगमान्न चैतद्युक्तं
विरोधाद्वैयर्थ्यसातिनाज्ञानमुपपद्यत इति। न जीवाश्रयत्वोपगमात्॥ नन्वैकमुक्तं॥ सत्यं। सत्यप्येकत्वे प्रतिबिंबासन्यथ्यस्तत्वा
णां॥ अथ ब्रह्मणः सर्वज्ञत्वविरोधाद्धेत्॥ दर्शनादेवं सर्वज्ञत्वाविद्याश्रयत्वयोः सत्यप्येकत्वे विरोधः तस्मान्नैकत्वमविद्याश्रयत्वे
त्वमत्वाद्धेर्वे अदर्शनात्॥ अवद्यातत्त्वतायाश्चाविरोधात्॥ व्याढमतएवाथादिति॥ द्वेकस्वप्रकाशत्वे सर्वज्ञत्वे च सत्येवानवभासदर्शनाद्व्याप्तादिकाविद्याकल्पते तन्वथा
नाविरुध्यंते॥ किं चाविद्यामेवोपपादयतीत्याह व्याढमत॥ ततश्च तमोऽन्तरतनीहारा ज्ञानाद्वैतत्वादिशब्दा अनवभासाध्यासनिमित्तभावरूपाज्ञानप्रतिपादकाश्च
मेदजाड्यं किं। चित्स्वभावस्य ज्ञानाभावमात्रमेव स्यात्॥ विभागः किं निबंधनो यतः सर्वज्ञत्वाविद्याश्रयत्वे कथं वस्याप्येते इति अंतःकरणावच्छेदकाद्धि द्रष्टृवक्ति॥
ध्येरन्निति॥ नन्वेकद्रव्यत्वे सति जीवब्रह्मविभागः॥ इति। तत्सर्वं व्यावर्तयति। ततो नादिसिद्धाविद्यावच्छिन्नेति॥ आत्मावरणमात्माज्ञानमेव
अन्यस्त्वतिरेकात्॥ अपरस्तु स्वभावाद्देवांशांत्रिभावः निमित्तमज्ञानमितिअवच्छेदस्यापि प्रातिभासिकाध्यासस्य तदुपादानत्वात्स्वतो निरवयव
जीवब्रह्मविभागाद्यध्यासोपादानं यतो जीवावच्छेदनाद्वित्वबीजांकुरवदनादिप्रवाहस्वरूपंति त्वात्तदुपादानमपज्ञानमनादीत्यात्तनादिसिद्धेति॥ अना
स्य द्वैधीभावायोगात् कर्तृत्वभोक्तृत्वदोषसंयोगानां बीजांकुरवदनादित्वात्। अविद्यावच्छिन्नेति॥ न चांतःकरणमवच्छेदकं मध्ये तो विदारणाभावात्
दिजीवविभागाध्यासप्रवाहस्यानाद्यविद्यैव कारणं नांतःकरणं तु स्यात् अंतःकरणस्य च सम्यग्ज्ञानानिरस्यतयाऽविद्याध्यासत्वात्॥ स्वकारणा वाच्छिन्न स्यैवाव
अवच्छेदस्य विभ्रममात्रत्वाद्ज्ञानस्यैव तदुपादानत्वाद्यवच्छेदोपाधित्वाभावात्॥ सुषुप्त्यादौ चांतःकरणाभावाद्धनवच्छेदकत्वप्रसंगात्तदापि सूक्ष्मावस्थ
च्छेदकत्वसंभवात्सत्यत्वेऽपि साद्देरनाद्यवच्छेदोपाधित्वाभावात्॥ अनवयवत्वोपपत्तेः सूक्ष्मता। सावयवस्यावयवाभावे स्वरूपनाशात्॥ अभावावयवापचयमात्रं
मंतःकरणमवच्छेदकमिति चेत् न तावन्निरवयवत्वोपपत्तेः

सूक्ष्मता॥ न॥ अनवस्थितावयविनो कार्यत्वप्रसंगात्॥ कारणात्मनावस्थितिरिति चेत्॥ किं कारणतामेवावस्थितमित्यर्थः॥ कार्यमपीति वा॥ पूर्वस्मिन्नंतःकरणाभा
वोत्तरस्मिन्स्थित्यवस्थातो न विरोधः॥ तस्मात्कार्यसंस्कारविशिष्टमनाक्किमत्कारणावस्थानमेव सूक्ष्मता प्राप्तिः॥ अतो नांतःकरणा
भावासामर्थ्यादि। जीवब्रह्मविभागसिद्धेर्नातिरेककल्पनावकाशो। जीवस्य ब्रह्मणोऽविच्छेद्यविद्या पूर्वमेव विभागमपेक्षत इति चेत्तदवच्छेदकमस्ति। कुतः पाठि
तिअतिरेकस्यापि विभागपुरःसरत्वप्रतीतेर्यथा मे माया नो विधार्मिप्रतियोगि॥ भिन्नाभिन्ने दनोपरज्यते कस्य कस्माद्भेद इत्येवमतिरेकाधीनेऽपि जीवब्रह्म
भावब्रह्मभावस्तस्मिन्नुपरज्यते॥ जीवो न ब्रह्मणोऽतिरेक इति चेद्विद्यायामपि तुल्यमेतत्॥ निरंशत्वान्नांशांशि॥ भेदभावे नभेदः संभवः संभवति। तस्मादवि
थैवमेवाध्यासनिमित्तमिति॥ नन्वविद्या किंसंबंधिनी भेदनिमित्तं॥ ननु इदमपि द्रव्यं वा किंसंबंधिनीत्यप्रतिबंधभेदनिमित्तं॥ मुखमात्रसंबंधात्ति॥ चे
त्वा॥ इत्यविच्छिन्नवस्तुपमात्रसंबंधज्ञानं तत्र जीवब्रह्मव्यवहारभेदप्रवृत्तेर्याति॥ कथं पुनः स्ववस्तुपमात्रसंबंधि॥ प्रति॥ नो ज्ञानस्य ब्रह्मस्वरूपं प्रति
ष्टस्येजीवविभागेकपक्षपातिता। दर्पणादाददर्पणःस्वयाकाशेभेदहेतुत्वयामुखादिसंसर्गिणोऽपि प्रति॥ बिंबाकाशोपरि इत्यप्रातिबिंबघटाकाशा॥ दृप्रस्य
पातित्ववदितिवद्भ्रमः॥ ननु किमाश्रयेयमविद्या नतावदंतःकरणाश्रिता स्वरूपाश्रया प्रमाताभावात्॥ नन्वहमज्ञ इति प्रतिभासस्य विशेषाश्र
मत्वेप्रमातृत्वं॥ न अहमनुभवामीत्यनुभवस्यापि चेतन्यप्रकाशस्य विशेषाश्रयत्वप्रसंगात्॥ ननु यथा योऽहं तीतिद्दग्धृत्वायसोरेकाग्निसंबं
धातपरस्परसंबंधावभासस्तथानुभवांतःकरणयोरेकात्मसंबंधात्तथावभासः॥ न। अंतःकरणस्यानुभवाश्रयत्वादिति चेद्वज्ञानांतःकर
तायोरेकात्मसंबंधादहमनुभवामीत्यवभासोऽनांतःकरणस्याज्ञानसंबंधादिति तुल्यं। प्रतीतेरन्यथासिद्धौ परस्परसंबंधकल्पनायोगाद्यमन्य
विद्यासंबंधस्य स्वरूपत्वे प्रतिपन्नत्वाच्च॥ अथ स्वरूपमात्राश्रयत्वानुपपत्तौ विशिष्टाश्रय एवैकेऽल्प्यत इति चेन्न॥ विशिष्टेऽपि विशिष्टेऽपि
स्वरूपसंबंधस्य विद्यमानत्वाज्जडस्य चाज्ञानाश्रयत्वेऽत्यंतसम्यग्ज्ञानयोरपि नाश्रयत्वप्रसंगात्॥ नन्वस्वरूपेऽपि ब्रह्मत्यनुपपाति
स्तुत्या॥ सत्यं॥ अनुपपन्नद्वयाश्रयत्वकल्पना दूरं संप्रतिपन्नस्वरूपाश्रयत्वोपादानं॥ मोक्षावस्थासंबंधिनएव वंधाश्रयत्वात्। अत्र
कार्ये इतः करणस्यैवाज्ञानमिति जल्पति॥ स वक्तव्यः॥ किमात्मा सर्वतः किंचिद्बोधः किंचिद्बुद्धेकदाचिन्नजानातीति विषया नवबोध
येवात्मनो भ्रांतिः॥ अथाप्यहमित्याज्ञानयोरात्माश्रयत्वेऽपि॥ सद्॥ भावरूपोऽज्ञानमंतःकरणाश्रयमिति चेत्॥ किं तत्र ज्ञानादन्यच्चेत्
ज्ञानं का चकामत्ताद्यनामप्यज्ञानत्वाभाविवादः॥ अथ ज्ञानविरोधीति॥ भिन्नाश्रययोर्ज्ञानाज्ञानयोरेकविषययोरपि विरोधित्वाद्दर्श
नात्॥ कारणाश्रयममदीनं च त्राश्रयज्ञानेनाविरुध्यत इति चेत्॥ न। प्रमाणाभावात्॥ फलकार्यतरस्वरूपत्वोच्च तद्दीयेनांतःकरण
णेयमानेन करणभूतेन तन्निमित्तकर्मानुमानेऽपि तद्दीयांतःकरणाज्ञाननिवृत्त्यदर्शनात्॥ भ्रांतिनिमित्तदोषप्रत्याक्लोपाद्विवकर

वि०१६

त्वाश्रयमज्ञानमिति चेन्न चक्षुरादावपि प्रसंगात्॥ सादित्वात्तेषामनाद्यज्ञानाश्रयत्वानुपपत्तिरिति चेदंतःकरणेऽपि तुल्यं॥ सत्कार्यवादाश्रयणा
न्नसाद्यंतःकरणमिति चेत् चक्षुरादावपि तुल्यं॥ अतो न तदनाद्यज्ञानाश्रय इति॥ अनृतनीहारादिशब्दैश्च प्रावृतज्ञानानामस्मद्वतां चेतन
नवतां चेतनानामेवावृतत्वाभिधानान्नांतःकरणाश्रयमज्ञानं किंतु चेतन्याश्रयमित्यलमतिविस्तरेण॥ न द्वैतदृष्टाविद्यावच्छिन्नानंतजीवे
ति॥ न्यायः प्रदर्शितः॥ श्रुतिस्त्वन्ययुष्माकमंतरं बभूव नीहारेण प्रावृता इति॥ व्यवधायकमज्ञानं दर्शयति॥ विभेदजनके ज्ञाने नाशमा
त्यंतिकं गते॥ आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति॥ इति स्मृतिः॥ ननु ब्रह्मव्यतिरिक्तमनादिवस्तु नास्तीति न त्राहृतथा च स्मृतिरिति।
अत इत्युपसंहारः॥ स्पष्टार्थः॥ स्वयंप्रकाशस्याविद्याश्रयत्वमनुपपन्नमित्युक्तं इदानीं प्रकाशमानस्याविद्याश्रयभावो नोपपद्यत इत्या
दिशति॥ ननु प्रमाणविरोध इति॥ ननु त्वदुक्तमर्थं न जानामीति प्रतिभासमानमेवाज्ञानस्य व्यावर्तकमवभासते। नन्वेतत्र विशेषाकारस्यानवग
तस्यैवाव्यावर्तकता॥ नानवभासमानस्य व्यावर्तकतया प्रतिभासानुपपत्तेः। न चावभासमानस्यापि तद्व्यावर्तकत्वमनुपपन्नमेव। न। अज्ञानसं
बंधस्य प्रतिभासमात्रशरीरत्वादनुपपत्तेरलंकारत्वात्प्रतिभासस्तु विद्यतरवत्तत्र कथं प्रतीयमानस्याविद्याविषयत्वानुपपत्तिरित्याद्यु
पाति॥ किं तत्प्रमाणमिति॥ निरंशस्यापि परिहारः॥ संविदप्य मे दोषपरोक्षप्रकाशोऽमामेनतानाम॥ शारीरादेह ब्रह्म स्वयंज्योतिरात्मप्रकाशो
नाविभिन्नस्ततं जीवाऽपरोक्षस्यव॥ तथापि न प्रकाशत इति सिद्धांती परिहरति॥ ननु भोः कुर्विति॥ न तूष्णीं के स्यादिः स्पष्टार्थः॥ प्रत्यर्थज्ञाने
मेवनेदज्ञानमतोऽहमित्यात्मप्रत्यर्थज्ञानमेव नेदमिति प्रत्यक्षमिति मीमांसकंमन्यश्चोदयति॥ कथं पुनर्भोः कोऽति॥ संसर्गाध्यासोऽपि मे
दानवगमनिमित्तमिति सर्वत्र व्याप्तमिति परिहरति॥ ननु गौता इत्याह इत्यादिना॥ आह गौतमवादी न चेहमिति यदीति॥ ननु प्रत्यक्षावभासं बाधि
त्वागमानुमानाभ्यामेव व्यतिरेकोऽग्रहणमिति नेत्यागमानुमानयोरप्रीति। ननु मिथ्यात्वात्प्रत्यक्षावभासस्य दृष्टं च द्वावभासस्येव ताभ्यां
मेव बाध्यत इति चोदयति॥ मिथ्यात्वात्तस्येति॥ यत्रापि विचारपुरःसरमेव प्रत्यक्षावभासमप्यनुमानादिना दृष्टमिति बाधितमिति। तेन व्यवहारं चभव
ति॥ तन्न तथा भवतु॥ यत्र पुनर्विचारपदवीमुपारूढयोर्ज्ञानयोर्बलाबलचिंतया बाधाभिप्रायस्तत्रानुमानादिना प्रत्यक्षस्य मिथ्यात्वसिद्धिरिति
६ मत्वाकृतस्तर्हि स्यादिना॥ उच्यत इत्यतः प्राक्तनेन ग्रंथेन॥ स्पष्टार्थो ग्रंथः॥ किमर्थं तो व्यतिरिक्तात्मविषयोऽहंकार उच्यते॥ किं वा प्रतिभा
